श्रीचिदम्बराष्टकम्

(सप्तैव श्लोकाः मातृकायां सन्ति)

चित्तजान्तकं चित्स्वरूपिणं चन्द्रमृगधरं चर्मप्रिय(चर्मभी)करम् ।
चतुरभाषणं चिन्मयं गुरुं भज चिदम्बरं भावनास्थितम् ॥ १॥
दक्षमर्दनं दैवशासनं द्विजहिते रतं दोषभञ्जनम् ।
दुःखनाशनं दुरितशासनं भज चिदम्बरं भावनास्थितम् ॥ २॥
बद्धपञ्चकं बहुलशोभितं बुधवरैर्नुतं भस्मभूषितम् ।
भावयुक्स्तुतं बन्धुभिः स्तुतं भज चिदम्बरं भावनास्थितम् ॥ ३॥
दीनतत्परं दिव्यवचनदं दी(र)क्षितापदं दिव्यतेजसम् ।
दीर्घशोभितं देहतत्वदं भज चिदम्बरं भावनास्थितम् ॥ ४॥
क्षितितलोद्भवं क्षेमसम्भवं क्षीणमानवं क्षिप्रसद्यवम् ।
क्षेमदात्रवं क्षेत्रगौरवं भज चिदम्बरं भावनास्थितम् ॥ ५॥
तक्षभूषणं तत्त्वसाक्षिणं यक्षसागणं भिक्षुरूपिणम् ।
भस्मपोषणं व्यक्तरूपिणं भज चिदम्बरं भावनास्थितम् ॥ ६॥
यस्तु जापिकं चिदम्बराष्टकं पठति नित्यकं पापहं सुखम् ।
कठिनतारकं घटकुलाधिकं भज चिदम्बरं भावनास्थितम् ॥ ७॥

॥ इति श्रीचिदम्बराष्टकं सम्पूर्णम् ॥

| श्री अरुणाचलाष्टकम् |

दर्शनादभ्रसदसि जननात्कमलालये ।
काश्यां तु मरणान्मुक्तिः स्मरणादरुणाचले ॥ १॥
करुणापूरितापाङ्गं शरणागतवत्सलम् ।
तरुणेन्दुजटामौलिं स्मरणादरुणाचलम् ॥ २॥
समस्तजगदाधारं सच्चिदानन्दविग्रहम् ।
सहस्ररथसोपेतं स्मरणादरुणाचलम् ॥ ३॥
काञ्चनप्रतिमाभासं वाञ्छितार्थफलप्रदम् ।
मां च रक्ष सुराध्यक्षं स्मरणादरुणाचलम् ॥ ४॥
बद्धचन्द्रजटाजूटमर्धनारीकलेवरम् ।
वर्धमानदयाम्भोधिं स्मरणादरुणाचलम् ॥ ५॥
काञ्चनप्रतिमाभासं सूर्यकोटिसमप्रभम् ।
बद्धव्याघ्रपुरीध्यानं स्मरणादरुणाचलम् ॥ ६॥
शिक्षयाखिलदेवारिभिक्षितक्ष्वेलकन्धरम् ।
रक्षयाखिलभक्तानां स्मरणादरुणाचलम् ॥ ७॥
अष्टभूतिसमायुक्तमिष्टकामफलप्रदम् ।
शिष्टभक्तिसमायुक्तान् स्मरणादरुणाचलम् ॥ ८॥
विनायकसुराध्यक्षं विष्णुब्रह्मेन्द्रसेवितम् ।
विमलारुणपादाब्जं स्मरणादरुणाचलम् ॥ ९॥
मन्दारमल्लिकाजातिकुन्दचम्पकपङ्कजैः ।
इन्द्रादिपूजितां देवीं स्मरणादरुणाचलम् ॥ १०॥
सम्पत्करं पार्वतीशं सूर्यचन्द्राग्निलोचनम् ।
मन्दस्मितमुखाम्भोजं स्मरणादरुणाचलम् ॥ ११॥

॥ इति श्रीअरुणाचलाष्टकं सम्पूर्णम् ॥

| श्री अरुणाचलाष्टकम् |

दर्शनादभ्रसदसि जननात्कमलालये ।
काश्यां तु मरणान्मुक्तिः स्मरणादरुणाचले ॥ १॥
करुणापूरितापाङ्गं शरणागतवत्सलम् ।
तरुणेन्दुजटामौलिं स्मरणादरुणाचलम् ॥ २॥
समस्तजगदाधारं सच्चिदानन्दविग्रहम् ।
सहस्ररथसोपेतं स्मरणादरुणाचलम् ॥ ३॥
काञ्चनप्रतिमाभासं वाञ्छितार्थफलप्रदम् ।
मां च रक्ष सुराध्यक्षं स्मरणादरुणाचलम् ॥ ४॥
बद्धचन्द्रजटाजूटमर्धनारीकलेवरम् ।
वर्धमानदयाम्भोधिं स्मरणादरुणाचलम् ॥ ५॥
काञ्चनप्रतिमाभासं सूर्यकोटिसमप्रभम् ।
बद्धव्याघ्रपुरीध्यानं स्मरणादरुणाचलम् ॥ ६॥
शिक्षयाखिलदेवारिभिक्षितक्ष्वेलकन्धरम् ।
रक्षयाखिलभक्तानां स्मरणादरुणाचलम् ॥ ७॥
अष्टभूतिसमायुक्तमिष्टकामफलप्रदम् ।
शिष्टभक्तिसमायुक्तान् स्मरणादरुणाचलम् ॥ ८॥
विनायकसुराध्यक्षं विष्णुब्रह्मेन्द्रसेवितम् ।
विमलारुणपादाब्जं स्मरणादरुणाचलम् ॥ ९॥
मन्दारमल्लिकाजातिकुन्दचम्पकपङ्कजैः ।
इन्द्रादिपूजितां देवीं स्मरणादरुणाचलम् ॥ १०॥
सम्पत्करं पार्वतीशं सूर्यचन्द्राग्निलोचनम् ।
मन्दस्मितमुखाम्भोजं स्मरणादरुणाचलम् ॥ ११॥

॥ इति श्रीअरुणाचलाष्टकं सम्पूर्णम् ॥

अष्टमूर्तिस्तुतिः

क्षितिमूर्ते नमस्तुभ्यं जाता निक्षिति कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ १॥
जलमूर्ते नमस्तुभ्यं जाता निजलकर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ २॥
वह्निमूर्ते नमस्तुभ्यं जाता निवह्नि कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ३॥
वायुमूर्ते नमस्तुभ्यं जाता निस्पर्श कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ४॥
व्योममूर्ते नमस्तुभ्यं जाता निव्योम कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ५॥
चन्द्रमूर्ते नमस्तुभ्यं जाता निस्वान्त कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ६॥
सूर्यमूर्ते नमस्तुभ्यं जाता निदृश्य कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ७॥
यष्टृमूर्ते नमस्तुभ्यं जाता नियम्य कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ८॥
अष्टमूर्तेस्तुतिमिमां यः पठेच्छिवसन्निधौ ।
किल्बिषादखिलान्मुक्तस्स्वर्गं मोक्षञ्चविन्दति ॥ ९॥

इत्यष्टमूर्ति स्तुतिः ॥

ॐ नमः शिवाय।

ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।

COLLECTION BY DIPTI DHAKUL

| शिवाष्टकम् |

शावशादष्टदिगन्तराले
ान्तरभ्रान्तमशान्तबुद्धिम् ।
कारमात्रादवनीसुरं मा-
...शिव पाहि शम्भो ॥ १॥
सास्थिमज्जामलमूत्रपात्र-
द्रावनं मन्मथपीडिताङ्गं
ामयं मां शिव पाहि शम्भो ॥ २॥
सारमायाजलधिप्रवाह-
मग्नमुद्भ्रान्तमशान्तचित्तम् ।
त्पादसेवाविमुखं सकामं
र्ज्जनं मां शिव पाहि शम्भो ॥ ३॥
टानृतं भ्रष्टमनिष्टधर्म्म
टात्मबोधं नयलेशहीनम् ।
ष्टारिषड्वर्गनिपीडिताङ्गं
ोतमं मां शिव पाहि शम्भो ॥ ४॥
वेदागमाभ्यः सरसानभिज्ञं
पादारविन्दं तव नार्च्चयन्तम् ।
वेदोक्तकर्म्माणि विलोपयन्तं
वेदाकृते मां शिव पाहि शम्भो ॥ ५॥
अन्यायवित्तार्ज्जन सक्तचित्तं
अन्यासु नारीष्वनुरागवन्तम् ।
अन्यान्नभोक्तारमशुद्धदेहं
आचारहीनं शिव पाहि शम्भो ॥ ६॥
पुरात्ततापत्रयतप्तदेहं
परां गतिं गन्तुमुपायवर्ज्जम् ।
परावमानैकपरात्मभावं
नराधमं मां शिव पाहि शम्भो ॥ ७॥
पिताऽथ संरक्षतु पुत्रनीशो (पिता यथा रक्षति)
जगत्पिता त्वं जगत्सहायः । (जगतः सहायम्)
कृतापराधं तव सर्वकार्ये
कृपानिधे मां शिव पाहि शम्भो ॥ ८॥

इति अपराधाष्टकं अथवा शिवाष्टकं सम्पूर्णम् ।

जगज्जालपालं जनस्तुत्यशीलम्
भवारण्यदावं भृत स्वानुभावम् ।
शिवानन्दकोशं दिनेशप्रकाशम्
महालिङ्गरूपं भजे लिङ्गलिङ्गम् ॥ १॥
स्वतन्त्र स्वलीलं गणेन्द्रानुकूलम्
मिलन्मूलमन्त्रं प्रणीतेश तन्त्रम् ।
शिवध्यानसक्तं परानादिमुक्तम्
महालिङ्गरूपं भजे लिङ्गलिङ्गम् ॥ २॥
परिव्राड्वरेण्यं गणेशाग्रगण्यम्
सदासत्यभाषं शिवज्ञानभूषम् ।
सरुद्राक्षमालं लसद्भस्मफालम्
महालिङ्गरूपं भजे लिङ्गलिङ्गम् ॥ ३॥
शिवाचारपक्षं कृपाभृत्कटाक्षम्
षडध्यादिबीजं नतामर्त्यभूजम् ।
परित्यक्तरागं परब्रह्मयोगम्
महालिङ्गरूपं भजे लिङ्गलिङ्गम् ॥ ४॥
कलासत्कलापं कपर्दिस्वरूपम्

| अर्धनारीश

श्रीगणेशा

मन्दारमालालुलितालकायै
दिव्याम्बरायै च दिगम्बराय नम
एकः स्तनस्तुङ्गतरः परस्य
यस्याः क्रियार्धस्थितिमुद्धहन्त्या
यस्योपवीतगुण
वक्षोरुहः कुचप
तस्मै ममास्तु त
चन्द्रार्धमौलिशिरसे
स्वेदार्द्रवामकुच
संशोषिदक्षिणक
स्त्रीपुंनपुंसकपद
शम्भोस्तनुः सुखयतु
इत्यर्धनारीश्वर

ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ

त्रियम्बको नाम गिरिरस्ति प्रियतमो मम ।
मन्दराख्यापि कैलासात्तथैव कनकाचलात् ॥ १॥
ते निवासा महेशस्य त्रियम्बकगिरिस्त्वहम् ।
त्रियम्बकेश्वरं नाम्ना तल्लिङ्गं परमाद्भुतम् ॥ २॥
तल्लिङ्गं येन दृष्टं स्यात्तेन दृष्टा त्रिलोकिका ।
त्रैलोक्ये यानि लिङ्गानि तानि सर्वाणि शङ्करी ॥ ३॥
त्रियम्बकेश्वरं लिङ्गं मम सर्वार्थसिद्धिदम् ।

अष्टमूर्तिः

क्षितिमूर्ते नमस्तुभ्यं जाता निक्षिति कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ १॥
जलमूर्ते नमस्तुभ्यं जाता निजलकर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ २॥
वह्निमूर्ते नमस्तुभ्यं जाता निवह्नि कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ३॥
वायुमूर्ते नमस्तुभ्यं जाता निस्पर्श कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ४॥
व्योममूर्ते नमस्तुभ्यं जाता निव्योम कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ५॥
चन्द्रमूर्ते नमस्तुभ्यं जाता निस्वान्त कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ६॥
सूर्यमूर्ते नमस्तुभ्यं जाता निदृश्य कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ७॥
यष्टृमूर्ते नमस्तुभ्यं जाता नियम्य कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ८॥
अष्टमूर्तेस्स्तुतिमिमां यः पठेच्छिवसन्निधौ ।
किल्बिषादखिलान्मुक्तस्स्वर्गं मोक्षञ्चविन्दति ॥ ९॥

इत्यष्टमूर्ति स्तुतिः ॥

॥ शिव तांडव स्तोत्रम् ॥

जटाओ से है जिनके जल प्रवाह मात गंग का,
गले में जिन के सज रहा है हार विष भुजंग का
डमड्ड मड्ड मड्ड डमरु कह रहा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
जो नन्दनी के वंदनीय,नन्दनी स्वरूप है,
वे तीन लोक के पिता,स्वरूप एक रूप है
क्रपालू ऐसे है के चित्त जप रहा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
समस्त प्राणियों में उनकी ही कृपाएं बह रही
भुजंग देवता के शीर्ष मणि प्रभाएँ कह रही
दशा दशा शिवः शिवम् दिशा दिशा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
वे देव देवताओं के अनादि से गढ़े हुए
समक्ष उनके धूल पुष्प शीर्ष पर चढ़े हुए
विभिन्न कामनाओ के है सम्पदा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
जो इंद्रा देवता के भी घमंड का दमन करें
जो कामदेव की समस्त कामना दहन करें
वही समस्त सिद्धियां वही महा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
विशाल भाल पट्टिका पे अग्नि वे जलाए हैं
वे भष्म काम देवता के शीर्ष पर लगाए हैं
है नंदनी के रुप की तरल छटा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
नविन श्याम मेघ कंठ पर सवार घर चले
वही तो बाल चंद्र नाग गंग शीश धर चले
सकल जगत का भार भी चले उठा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
है नील कंठ सौम्य नील पंकजा समान है,
मनुष्य क्या वे देवता के दंड का विधान है
समक्ष उनके काल स्वयं भज रहा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
सदैव सर्व मंगला,कला के शीर्ष देवता
वही विनाश काल है,वही जनक जनन सदा
नमन कृतज्ञ,प्राण यह जपे सदा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
प्रचंड ताण्डवः प्रभः स्वयं विलीन देख कर
की नित्य देवता को नृत्य में प्रलीन देख कर
मृदंग मुग्ध भावना से कह उठा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्

है मात्र एक कामना है मात्र एक वंदना
उन्ही के दर्शनों से पूर्ण हो सभी उपासना
न जाने कब करेंगे हम पे यह कृपा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
चरण को जिनके अप्सराओं के पराग चूमते
शरण में जिनके इंद्रालोक और देव झूमते
अनादि से उमंग की परमरा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
प्रचंड अग्नि से समस्त पाप कर्म भष्म कर
महान अष्ट सिद्धि से सभी अधर्म भष्म कर
विजय के मूल मन्त्र की है साधना शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
वही अघोर नाथ है उन्ही से पूर्ण शुद्धता
निहित उनके जाप में मनुष्यता विशुद्धता
समस्त मोह नाश के हैं देवता शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
पूजा वसान ध्यान से करे जो पाठ स्तोत्र का
मुकुट बने वही मनुज परम विशिष्ट गोत्र का
उसी को देते है समस्त सम्पदा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
वे शेष है,अशेष है,प्रशेष है,विशेष है
जो उनको जैसा धार ले वो उसके जैसा वेष है
वे नेत्र सूर्य देवता का चंद्रमा का भाल है,
विलय भी वे प्रलय भी वे,अकाल,महाकाल है
उसी के नाथ हो गये,जो उनके साथ हो लिया,
वही के हो गये है वे जहाँ सुना शिवः शिवम्
डमड्ड मड्ड मड्ड डमरु कह रहा शिवः शिवम्,
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्
तरल,अनल,गगन,पवन,धरा धरा शिवः शिवम्

हर हर महादेव

Sung by: Ashutosh Rana

॥ श्रीकालान्तकाष्टकम् ॥

॥ श्रीगणेशाय नमः ॥

कमलापतिमुखसुरवरपूजित
काकोलभासितग्रीव ।
काकोदरपतिभूषण
कालान्तक पाहि पार्वतीनाथ ॥ १॥

कमलाभिमानवारणदक्षाङ्घ्रे
विमलशेमुषीदायिन् ।
नतकामितफलदायक
कालान्तक पाहि पार्वतीनाथ ॥ २॥

करुणासागर शम्भो
शरणागतलोकरक्षणधुरीण ।
कारण समस्तजगतां
कालान्तक पाहि पार्वतीनाथ ॥ ३॥

प्रणतार्तिहरणदक्ष
प्रणवप्रतिपाद्य पर्वतावास ।
प्रणमामि तव पदाब्जे
कालान्तक पाहि पार्वतीनाथ ॥ ४॥

मन्दार नतजनानां वृन्दारकवृन्दगेयसुचरित्र ।
मुनिपुत्रमृत्युहारिन् कालान्तक पाहि
पार्वतीनाथ ॥ ५॥

माराररण्यदवानल मायावारीन्द्रकुम्भसञ्जात ।
मातङ्गचर्मवासः कालान्तक पाहि
पार्वतीनाथ ॥ ६॥

मोहान्धकारभानो मोदितगिरिजामनःसरोजात ।
मोक्षप्रद प्रणमतां कालान्तक पाहि
पार्वतीनाथ ॥ ७॥

विद्यानायक मह्यं विद्यां
दत्त्वा निवार्य चाविद्याम् ।
विद्याधरादिसेवित कालान्तक पाहि
पार्वतीनाथ ॥ ८॥

कालान्तकाष्टकमिदं
पठति जनो यः कृतादरो लोके ।
कालान्तकप्रसादात्कालकृता
भीर्न सम्भवेत्तस्य ॥ ९॥

| श्री अमरनाथार्तिक्यम् |

जय जय जय शिवशङ्कर करुणाघन ईश
काश्मीरगिरिविहारिन् जयजय अमरेश ॥ १॥
ॐ हर हर हर महादेव ॥ ध्रु. ॥
उद्यत्सूर्यसमप्रभ दुग्धार्णव धवल ।
प्रालेयाप्लुतमूर्ते स्मरभञ्जनशील ॥ २॥ ॐ हर .. ॥
जगदुत्पत्तिः सर्वा तव शम्भो लास्यम् ।
अवनेरवनं सुरनरसहितं तव हास्यम् ॥ ३॥ ॐ हर .. ॥
या ते रुद्र शिवातनुरमृता हिमवेशे ।
अभिचाकशीहि भगवन् तयैव हृद्देशे ॥ ४॥ ॐ हर .. ॥
हिमगिरिगह्वरवासं कृतकल्मषनाशम् ।
भक्तजनप्रियमीशं नमामि अविनाशम् ॥ ५॥ ॐ हर .. ॥
यो भक्त्याऽर्चयति त्वां अनन्यभावेन ।
कल्पतरुश्चिन्तामणिराप्तःखलु तेन ॥ ६॥ ॐ हर .. ॥
घनदसखं रत्नोज्वल-रूपं शशिशुभ्रम् ।
स्वयम्भुवं तं वन्दे शिरसाऽहमदभ्रम् ॥ ७॥ ॐ हर .. ॥
आर्तिक्यं तेऽस्तु मुदा प्रसीद परमात्मन् ।
विघ्नान् नाशय पूरय कामान् सर्वात्मन् ॥ ८॥ ॐ हर .. ॥

इति स्वामी वरदानन्दभारतीविरचितं श्रीअमरनाथार्तिक्यमं सम्पूर्णम् ।

॥ श्रीकाशीविश्वेश्वरादिस्तोत्रम् ॥

॥ श्रीगणेशाय नमः ॥

नमः श्रीविश्वनाथाय
देववन्द्यपदाय ते ।
काशीशेशावतारे मे देवदेव
ह्युपादिश ॥ १॥
मायाधीशं महात्मानं
सर्वकारणकारणम् ।
वन्दे तं माधवं देवं यः काशीं
चाधितिष्ठति ॥ २॥
वन्दे तं धर्मगोप्तारं सर्वगुह्यार्थवेदिनम् ।
गणदेवं ढुण्ढिराजं तं महान्तं
स्वविघ्नहम् ॥ ३॥
भारं वोढुं स्वभक्तानां
यो योगं प्राप्त उत्तमम् ।
तं सढुण्ढिं दण्डपाणिं वन्दे
गङ्गातटस्थितम् ॥ ४॥
भैरवं दंष्ट्राकरालं भक्ताभयकरं भजे ।
दुष्टदण्डशूलशीर्षधरं
वामाध्वचारिणम् ॥ ५॥
श्रीकाशीं पापशमनीं दमनीं दुष्टचेतसः ।
स्वनिःश्रेणिं चाविमुक्तपुरीं
मर्त्यहितां भजे ॥ ६॥
नमामि चतुराराध्यां
सदाऽणिम्नि स्थितिं गुहाम् ।
श्रीगङ्गे भैरवीं दूरीकुरु
कल्याणि यातनाम् ॥ ७॥
भवानि रक्षान्नपूर्णे
सद्वर्णितगुणेऽम्बिके ।
देवर्षिवन्द्याम्बुमणिकर्णिकां
मोक्षदां भजे ॥ ८॥

इति काशीविश्वेश्वरादिस्तोत्रं सम्पूर्णम् ।

॥ श्रीगिरिपल्लवनाथेश्वरस्तुतिः ॥

(श्रीदेवदानक्षेत्रे)

पल्लवसदृक्षतावकपदविन्यासाज्जगाम पल्लवताम् ।
यद्गिरिरसौ ततस्त्वं
गिरिपल्लवनाथशब्दवाच्योऽभूः ॥ १॥
वृक्षलतानां पल्लवमिह सिद्धं नैव भूमिधर्तुर्हि ।
शक्तिस्तवाद्भुतातो गिरिपल्लवमत्र दृष्टमतिचित्रम् ॥ २॥
गङ्गाधर करुणाकर बिम्बाधर बालकुमुदबन्धुधर ।
गरलाम्बरविनिवारण पादसरोजे नमस्ये ते ॥ ३॥

इति शृङ्गेरि श्रीजगद्गुरु
श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता
श्रीगिरिपल्लवनाथेश्वरस्तुतिः सम्पूर्णा ।

॥ कालहस्तीश्वरस्तुतिः॥

जम्बुद्वीपे भारताख्येऽत्र वर्षे हर्षेणास्थाद्यामयभागे व्यमर्षे ।
प्रत्यक्षश्रीकालहस्तीशसंज्ञः शम्भुर्यत्रागोऽपि कैलाससंज्ञः ॥ १॥
सुवर्णमुख्यासरतोविदूरे प्रासाद आस्ते सति याम्यतीरे ।
नगोऽपि तद्दक्षिणतोऽस्त्यदूरे यस्मिन्निवासोऽस्ति सदा स्मरारेः ॥ २॥
यथा गौरीश ते धाम क्ष्माधरे शिव राजते ।
राजते तद्वदत्रापि राजते देवराज ते ॥ ३॥
कैलासशैलादवतीर्य भक्तिप्रियो हरोऽशतात्सगणः सशक्तिः ।
यः कालहस्तीन्द्रहरिः स पायाच्छ्रीकालहस्तीश्वर आश्वपायात् ॥ ४॥
यत्क्षेत्रदृष्ट्यापि नरस्य ताताः सद्यो विनश्यन्त्यखिलाः सपापाः ।
दुर्दैवदैन्याद्यखिलं प्रकामं निवार्य यः पूरयति स्वकामम् ॥ ५॥

इति श्रीवासुदेवानन्दसरस्वतीविरचिता कालहस्तीश्वरस्तुतिः समाप्ता ।

।। काशीस्तुतिः ।।

धन्यासिकाशी शिवधन्यकाशी
गायन्तिमर्त्या सुखदाऽसि काशी ।
तवैव क्रोड़ए वसतोहि जीवाः
कालात् सुभीता नभवन्ति काशी ।। १।।
धन्यासि काशी सुखशान्ति राशी
घोरान्धकारे घनज्योति राशी ।
जीवान् स्वज्ञानेनप्रकाशदाऽसि
धन्याऽसि काशी शिववासदाऽसि ।। २।।
काश्यां मरण मात्रेण जीवानां श्रीसदाशिवः ।
ददाति तारकं मन्त्रं तेन जीवोविमुच्यते ।। ३।।
मरणासन्न जीवानां दक्षिणे कर्णगोलके ।
ददाति विमलं ज्ञानं निर्वाण पददायकम् ।। ४।।
अस्मिन्क्षेत्रे मृताजीवा मुक्ताएव न संशयः ।
इतिशास्त्र प्रमाणानि प्रवदन्तिमनीषिणः ।। ५।।
जटा विशाला नयना विशालाः
फणीन्द्रमाला परमा विशाला ।
अगाधगाम्भीर्य विमुक्तिशालां
कालस्य कालं प्रणमामि शम्भुम् ।। ६।।

इति श्री स्वामी उमेश्वरानन्दतीर्थविरचितं काशीषटकं सम्पूर्णम् ।

॥ श्रीसुन्दरभक्तस्तुतिः॥

गौरीशप्रतिबिम्बमद्भुततनुं चाष्टादशाब्दाकृतिं
श्रीजम्बूपुरजन्मभाजमनिशं त्यागेशसेवापरम् ।
गानैर्ग्राहविमुक्तबालजनकानन्दप्रदं वाग्मिनं
वन्दे सुन्दरमूर्तिमीशसुहृदं कैलासवासं सदा ॥ १॥
शैवब्राह्मणवंशजः शिवपरब्रह्मानुबिम्बात्मना
जातो भूगतशाम्भवस्थलवरानेकानटन् सूक्तिभिः ।
स्तावं स्तावममर्त्यगीतविभवोऽमर्त्यात्मनैरावतं
ह्यारूढो रजताद्रिशृङ्गमगमत् श्रीसुन्दरः सेव्यताम् ॥ २॥

इति श्रीसुन्दरभक्तस्तुतिः समाप्ता ।

॥ श्रीकालहस्तीश्वरस्तोत्रम्॥

महेश्वरं महोन्नतं महेश्वरं सदानम-
द्गणेश्वरं गुणान्वितं गणेश्वरं जगन्नुतम् ।
अनीश्वरं वृषाश्वरंहसाश्वरुद्रगामिनं (?)
सदा भजामि कालहस्तिसाम्बमूर्तिमीश्वरम् ॥ १॥

निटालविस्फुटैकदृक्तटालवह्निचिच्छटा
लसद्ध्वनिप्रकृज्जटालनिष्ठहैमनम् ।
घटीभवादिमौनिहृत्कुटीभवत्पदं त्रिगुं(विभुं)
सदा भजामि कालहस्तिसाम्बमूर्तिमीश्वरम् ॥ २॥

घनाघनादियज्ञभुग्घनाघनप्रचारकृद्-
द्युनाघनामहस्सुहृद्दृढासुहृद्धनुस्स्वनम् ।
घनाघनव्यपेटिकाघनाघनप्रभञ्जनं
सदा भजामि कालहस्तिसाम्बमूर्तिमीश्वरम् ॥ ३॥

जटाकुटीरधन्यधुन्यभङ्गभङ्गसङ्घटा-
घुमङ्घुमङ्घुमङ्घुमद्ध्वनिध्वनद्दरीस्फुटम् ।
कटीतटीघटीकृतोत्कटाजिनं ककुप्पटं
सदा भजामि कालहस्तिसाम्बमूर्तिमीश्वरम् ॥ ४॥

सुधाशनाधिराट्पुरीसुगह्वरीजमञ्जरी-
स्फुरन्मरन्दनिर्झरीधुराधुराधुरीणगीर्गणम् ।
विराट्तुरङ्गमार्गणं विशेषविष्णुमार्गणं (?)
सदा भजामि कालहस्तिसाम्बमूर्तिमीश्वरम् ॥ ५॥

॥ इति श्रीकालहस्तीश्वरस्तोत्रं सम्पूर्णम् ॥

॥ श्रीज्ञानसम्बन्धध्यानस्तुतिः ॥

श्रीकालीपुरवासिशम्भुचरणस्वान्तात्मजं बालकं
देवीदत्तपयः पिबन्तमनिशं गानैः स्तुतोमापतिम् ।
शूलारोपितजैनवीरनिवहं पाण्ड्येशरोगापहं
ध्यायेत्श्रीशिवभक्तवर्यमनघं सम्बन्धमूर्तिं गुरुम् ॥ १॥
सुब्रह्मण्यांशभूतः करतलविलसद्रुक्मतालाभिरामो
विप्रः कौण्डिन्यगोत्रः शिवपदहृदयस्यात्मजः सुन्दराङ्गः ।
नानाक्षेत्रेशतत्तन्नुतिभिरतितरां बोधयन् शैवतत्त्वं
भेजे मुक्तिं स सेव्यः शिवसमयगुरुः ज्ञानसम्बन्धमूर्तिः ॥ २॥

इति श्रीज्ञानसम्बन्धध्यानस्तुतिः समाप्ता ।

॥ श्रीकालभैरवपञ्चरत्नस्तुतिः ॥

खड्गं कपालं डमरुं त्रिशूलं हस्ताम्बुजे सन्दधतं त्रिणेत्रम् ।
दिगम्बरं भस्मविभूषिताङ्गं नमाम्यहं भैरवमिन्दुचूडम् ॥ १॥
कवित्वदं सत्वरमेव मोदान्नतालये शम्भुमनोऽभिरामम् ।
नमामि यानीकृतसारमेयं भवाब्धिपारं गमयन्तमाशु ॥ २॥
जरादिदुःखौघविभेददक्षं विरागिसंसेव्यपदारविन्दम् ।
नराधिपत्वप्रदमाशु नन्त्रे सुराधिपं भैरवमानतोऽस्मि ॥ ३॥
शमादिसम्पत्प्रदमानतेभ्यो रमाधवाद्यर्चितपादपद्मम् ।
समाधिनिष्ठैस्तरसाधिगम्यं नमाम्यहं भैरवमादिनाथम् ॥ ४॥
गिरामगम्यं मनसोऽपि दूरं चराचरस्य प्रभवादिहेतुम् ।
कराक्षिपच्छून्यमथापि रम्यं परावरं भैरवमानतोऽस्मि ॥ ५॥
इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता श्रीकालभैरवपञ्चरत्नस्तुतिः सम्पूर्णा ।

॥ कालहस्तीश्वरस्तुतिः॥

ॐ श्रीमहागणपतये नमः ।

गण्डूषस्य समं न्यधायि भवता मन्दाकिनी मस्तके
क्रव्यस्य प्रतिपादनेऽस्य सदृशो हस्ते मृगः स्थापितः ।
नेत्रस्यापि सदक्षमक्षिदशकं प्रादायि पञ्चोत्तरं
किं वर्ण्येत कृतज्ञता तव विभो श्रीकालहस्तीश्वर ॥ १॥
विन्यस्ते शबरेण मूर्ध्नि चरणे देहः कृतोऽप्यष्टवा
गण्डूषैरभिषेचने विरचिते वक्त्रं कृतं पञ्चधा ।
उच्छिष्टे विनिवेदिते पुनरसौ रूक्षं विषं भोजितः
शिक्षामस्य करोषि कर्मसदृशं श्रीकालहस्तीश्वर ॥ २॥
पाणौ तीक्ष्णपरश्वथः सहरिणः फालान्तराले शिखी
पाथो मूर्ध्नि च विद्यते तव करे पात्रं विधातुः शिरः ।
पक्तुं वामतनौ नगेन्द्रतनया किं वा किराताननन-
प्रभ्रष्टामिषवाञ्छितं कलयसि श्रीकालहस्तीश्वर ॥ ३॥
पादपाषाणगण्डूषपादुकाचापताडनैः ।
ज्ञातेयं तव गौरीश पितृमातृविहीनता ॥ ४॥
सर्वात्मता ते श्रुतिषु प्रसिद्धा सत्यैव सा कालकरीश नूनम् ।
अपश्यतस्त्वामधुना समस्तं यतो न मे दृष्टिपथं प्रयाति ॥ ५॥
नाहं विभूतिपरिकल्पितफालदेशो
रुद्राक्षदामपरिवेष्टितकन्धरो वा ।
श्रीकालहस्तिनगरीश्वरदासदास-
दासानुदासजनकिङ्करकिङ्करोऽस्मि ॥ ६॥

॥ इति श्रीकालहस्तीश्वरस्तुतिः सम्पूर्णा ॥

॥ कैलासशैलशिखराधिपतिस्तवः ॥

हे नीललोहित सदाशिव विश्वनाथ
मन्दाकिनी-सलिल-भूषण चन्द्रचूड ।
मृत्युञ्जय प्रणतभक्तजनार्तिनाशिन्
कैलास-शैल-शिखराधिपते नमस्ते ॥ १॥

कन्दर्प-दर्प-हर सर्प-विभूषिताङ्ग
भस्माङ्गराग नरमुण्ड-कपाल-माल ।
खट्वाङ्ग-शूल-डमरू-धर काशिनाथ
कैलास-शैल-शिखराधिपते नमस्ते ॥ २॥

शम्भो स्मरान्तक विभो वषभाधिरूढ
कारुण्य-वारि-जलधे प्रणमाम्यहं त्वाम् ।
संसार-सागर-जलादव मां महेश
कैलास-शैल-शिखराधिपते नमस्ते ॥ ३॥

त्रैलोक्यनाथ गिरिनाथ-सुताधिनाथ
भूताधिनाथ गणनाथ मखाधिनाथ ।
श्रीसोमनाथ जगतामधिनाथ नाथ
कैलास-शैल-शिखराधिपते नमस्ते ॥ ४॥

कर्पूरगौर हर शङ्कर घोररूप
हे नीलकण्ठ भुजगेश-विभूषिताङ्ग ।
विद्युत्प्रभारुणजटाधर वामदेव
कैलास-शैल-शिखराधिपते नमस्ते ॥ ५॥

विश्वावलीं सृजसि शैलसुतान्वितस्त्वं
विश्वम्भरोऽसि शिव-शक्तियुतो सुरेश ।
विश्वं विनाशयसि ताण्डव-नृत्य-काले
कैलास-शैल-शिखराधिपते नमस्ते ॥ ६॥

अज्ञान-कज्जल-विनाशकराय तुभ्यं
सूर्येन्दु-वह्नि-नयनाय सदा नमस्ते ।
दक्षात्मजा-प्रिय महेश्वर पार्वतीश
कैलास-शैल-शिखराधिपते नमस्ते ॥ ७॥

ओङ्काररूप शशिखण्ड-शिखण्ड-मौले
विश्वेश शर्व मदनान्तक शूलपाणे ।
रुद्राक्ष-हार विषमाक्ष पिनाकपाणे
कैलास-शैल-शिखराधिपते नमस्ते ॥ ८॥

कैलास-शैल-शिखराधिपतेः स्तवं यः
श्रद्धायुतो पठति नित्यमनन्यचित्तः ।
नश्यन्ति तस्य बहुजन्मकृतान्यघानि
शान्तिं च सोऽत्र लभते मनसः सुखं च ॥ ९॥

इति श्री आपटीकरविरचितः कैलासशैलशिखराधिपतिस्तवः सम्पूर्णः ।

॥ अर्धनारीश्वराष्टकम् ॥

अम्भोधरश्यामलकुन्तलायै तटित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय । नमः शिवायै च नमः शिवाय ॥ १॥
प्रदीप्तरत्नोज्ज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवप्रियायै च शिवाप्रियाय । नमः शिवायै च नमः शिवाय ॥ २॥
मन्दारमालाकलितालकायै कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय । नमः शिवायै च नमः शिवाय ॥ ३॥
कस्तूरिकाकुङ्कुमलेपनायै श्मशानभस्मात्तविलेपनाय ।
कृतस्मरायै विकृतस्मराय । नमः शिवायै च नमः शिवाय ॥ ४॥
पादारविन्दार्पितहंसकायै पादाब्जराजत्फणिनूपुराय ।
कलामयायै विकलामयाय । नमः शिवायै च नमः शिवाय ॥ ५॥
प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय ।
समेक्षणायै विषमेक्षणाय । नमः शिवायै च नमः शिवाय ॥ ६॥
प्रफुल्लनीलोत्पललोचनायै विकासपङ्केरुहलोचनाय ।
जगज्जनन्यै जगदेकपित्रे । नमः शिवायै च नमः शिवाय ॥ ७॥
अन्तर्बहिश्चोर्ध्वमधश्च मध्ये पुरश्च पश्चाच्च विदिक्षु दिक्षु ।
सर्वं गतायै सकलं गताय । नमः शिवायै च नमः शिवाय ॥ ८॥
अर्धनारीश्वरस्तोत्रं उपमन्युकृतं त्विदम् ।
यः पठेच्छृणुयाद्वापि शिवलोके महीयते ॥ ९॥

॥ इति उपमन्युकृतं अर्धनारीश्वराष्टकम् ॥

॥ अर्धनारीश्वरस्तोत्रम् ॥

चाम्पेयगौरार्धशरीरकायै कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय ॥ १॥
कस्तूरिकाकुङ्कुमचर्चितायै चितारजःपुञ्जविचर्चिताय ।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय ॥ २॥
झणत्क्वणत्कङ्कणनूपुरायै पादाब्जराजत्फणिनूपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै च नमः शिवाय ॥ ३॥
विशालनीलोत्पललोचनायै विकासिपङ्केरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः शिवायै च नमः शिवाय ॥ ४॥
मन्दारमालाकलितालकायै कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥ ५॥
अम्भोधरश्यामलकुन्तलायै तडित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ॥ ६॥
प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे नमः शिवायै च नमः शिवाय ॥ ७॥
प्रदीप्तरत्नोज्ज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमः शिवायै च नमः शिवाय ॥ ८॥
एतत्पठेदष्टकमिष्टदं यो भक्त्या स मान्यो भुवि दीर्घजीवी ।
प्राप्नोति सौभाग्यमनन्तकालं भूयात्सदा तस्य समस्तसिद्धिः ॥ ९॥

इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य

श्रीमच्छंकरभगवतः कृतौ अर्धनारीश्वरस्तोत्रम् संपूर्णम् ॥

श्रीमदखिलाण्डदेवीजम्बुकेश्वरस्तुतिः

(श्रीजम्बुकेश्वरक्षेत्रे)

अपराधसहस्राणि ह्यपि कुर्वाणे मयि प्रसीदाम्ब ।
अखिलाण्डदेवि करुणावाराशे जम्बुकेशपुण्यतते ॥ १॥

ऊर्ध्वस्थिताभ्यां करपङ्कजाभ्यां
गाङ्गेयपद्मे दधतीमधस्तात् ।
वराभये सन्दधतीं कराभ्यां
नमामि देवीमखिलाण्डपूर्वाम् ॥ २॥

जम्बूनाथमनोऽम्बुजातदिनराड्बालप्रभासन्ततिं
शम्बूकादिवृषावलिं कृतवतीं पूर्वं कृतार्थामपि ।
कम्बूर्वीधरधारिणीं वपुषि च ग्रीवाकुचव्याजतो
ह्यम्बूर्वीधररूपिणीं हृदि भजे देवीं क्षमासागरीम् ॥ ३॥

जम्बूमूलनिवासं कम्बूज्ज्वलगर्वहरणचणकण्ठम् ।
अम्बूर्वीधररूपं शम्बूकादेर्वरप्रदं वन्दे ॥ ४॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता श्रीमदखिलाण्डदेवीजम्बुकेश्वरस्तुतिः सम्पूर्णा ।

॥ ईशानस्तवः ॥

यः षड्वक्त्रगजाननाद्भुतसुताविष्कारणव्यञ्जिताचिन्त्योत्पादनवैभवां
गिरिसुतां मायां निजाङ्गे दधत् ।
सेव्यां संसृतिहानये त्रिपथगां विद्यां च मूर्ध्ना वहन्
स्वं ब्रह्मस्वमभिव्यनक्ति भजतः पायात् स गङ्गाधरः ॥ १॥
यस्यालोच्य कपर्ददुर्गविलुठत्गङ्गाम्बुशौक्ल्याच्छता-
माधुर्याणि पाराजयोदितशुचा क्षीणः कलामात्रताम् ।
बिभ्रत् पित्सति नूनमुत्कटजटाजूटोच्चकूटाच्छशी
लालाटक्षिशिखासु सोऽस्तु भजतां भव्याय गङ्गाधरः ॥ २॥
यल्लालाटकृपीटयोनिसततासङ्गाद्विलीनः शशी
गङ्गारूपमुपेत्य तत्प्रशमनाशक्तः कृशाङ्गः शुचा ।
उद्बध्नाति तनुं त्रपापरवशो मन्ये जटादामभिः
पायात् स्तव्यविभाव्यनव्यचरितो भक्तान् स गङ्गाधरः ॥ ३॥
अङ्कारूढधराधराधिपसुतासौन्दर्यसन्तर्जिता
गङ्गा यस्य कपर्ददुर्गमदने लीना विलीना ह्रिया ।
चिन्तापाण्डुतनुः स्खलन्त्यविरतं पार्वत्यसूयास्मितै-
रन्तर्धिं बहु मन्यतेऽस्तु भजतां भूत्यै स गङ्गाधरः ॥ ४॥

मुग्धां स्निग्ध इव प्रतार्य गिरिजामर्धाङ्गदानच्छलान्-
नित्योद्यद्बहुलभ्रमां त्रिपथगामात्मोत्तमाङ्गे वहन् ।
स्ताने यो विषमेक्षणस्वपदवीमारोप्यते कोविदैः
प्रच्छन्नप्रणयक्रमोऽस्तु भजतां प्रीत्यै स गङ्गाधरः ॥ ५॥
संवासज्जसुरासुरर्षिपरिषद्व्याकीर्णपुष्पाञ्जलि-
प्रश्च्योतन्मकरन्दबिन्दुसततासारः पतन्मस्तके ।
यस्याविश्रमसम्भृतस्त्रिपथगा नाम्ना जनैः ख्याप्यते
स त्रैलोक्यनिषेविताङ्घ्रियुगलः पुष्णातु गङ्गाधरः ॥ ६॥
यस्मिन्नुद्धतताण्डवैकरसतासाटोपनाव्यक्रमे
विस्रस्तासु जटासु भासुरतनुर्धाराशतैः पातुका ।
गङ्गाजङ्गमवारिपर्वतधियं चित्ते विधत्ते सता-
मेवं चित्रविभूतिरस्तु भजतां भव्याय गङ्गाधरः ॥ ७॥
यो गङ्गापयसि प्रभो तव महानत्यादरः कल्पते
सम्मूर्च्छद्द्विषयापनाय विधते क्रुद्ध्यस्यसत्योक्तये ।
ईशानस्तव सागरान्तगमने वाप्यः पुराण्योऽक्षमाः
सङ्क्षिप्येत्वममिष्टुतः ससितगुः प्रीतोऽस्तु गङ्गाधरः ॥ ८॥

इतीशनस्तवः सम्पूर्णः ॥

॥ श्रीमदृश्यशृङ्गेश्वरस्तुतिः ॥

कष्टारिवर्गदलनं शिष्टालिसमर्चिताङ्घ्रिपाथोजम् ।
नष्टाविद्यैर्गम्यं पुष्टात्माराधकालिमाकलये ॥ १॥
प्राणायामैर्ध्यानैनष्टं चित्तं विधाय मुनिवर्याः ।
यत्पश्यन्ति हृदब्जे शान्ताभाग्यं नमामि तत्किञ्चित् ॥ २॥
वेदोत्तमाङ्गगेयं नादोपास्त्यादिसाधनात्माख्यम् ।
खेदोन्मूलनदक्षं भेदोपाध्यादिवर्जितं नौमि ॥ ३॥
शान्तामानसहंसं कान्तारासक्तमुनिवरैः सेव्यम् ।
शान्ताहङ्कृतिवेद्यं कान्तार्धं नौमि शृङ्गशिवम् ॥ ४॥
इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता श्रीमदृश्यशृङ्गेश्वरस्तुतिः सम्पूर्णा ।

॥ श्रीमदखिलाण्डदेवीजम्बुकेश्वरस्तुतिः ॥

अपराधसहस्राणि ह्यपि कुर्वाणे मयि प्रसीदाम्ब ।
अखिलाण्डदेवि करुणावाराशे जम्बुकेशपुण्यतते ॥ १॥
ऊर्ध्वस्थिताभ्यां करपङ्कजाभ्यां
गाङ्गेयपद्मे दधतीमधस्तात् ।
वराभये सन्दधतीं कराभ्यां
नमामि देवीमखिलाण्डपूर्वाम् ॥ २॥
जम्बूनाथमनोऽम्बुजातदिनराड्बालप्रभासन्ततिं
शम्बूकादिवृषावलिं कृतवतीं पूर्वं कृतार्थामपि ।
कम्बूर्वीधरधारिणीं वपुषि च ग्रीवाकुचव्याजतो
ह्यम्बूर्वीधररूपिणीं हृदि भजे देवीं क्षमासागरीम् ॥ ३॥
जम्बूमूलनिवासं कम्बूज्ज्वलगर्वहरणचणकण्ठम् ।
अम्बूर्वीधररूपं शम्बूकादेर्वरप्रदं वन्दे ॥ ४॥
इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता
श्रीमदखिलाण्डदेवीजम्बुकेश्वरस्तुतिः सम्पूर्णा ।

॥ श्रीखण्डराजस्तोत्रम् ॥

श्रीशङ्करावतारोऽयं खण्डराजो महामतिः ।
तस्मै महालसेशाय मणिमल्लारये नमः ॥ १॥
ऋषीणां यस्तपःसिद्ध्या अवतीर्य महीतले ।
दैत्याननाशयत्तस्मै मणिमल्लारये नमः ॥ २॥
यो वेदमयमास्थाय महाश्वमपराजितम् ।
जघ्ने दैत्यरिपून्तस्मै मणिमल्लारये नमः ॥ ३॥
पीतवस्त्रपरीधानः पीताभरणभूषितः ।
त्रैलोक्यवन्दितस्तस्मै मणिमल्लारये नमः ॥ ४॥
मार्गशीर्षे महामासे प्रत्यब्दं यन्महोत्सवः ।
योऽभीष्टदो विभुस्तस्मै मणिमल्लारये नमः ॥ ५॥
देवः प्रतापमार्तण्डभैरवः शत्रुकृन्तनः ।
सर्वापत्तिहरस्तस्मै मणिमल्लारये नमः ॥ ६॥
खण्डराज प्रसीद त्वं सर्वापत्तिमपाकुरु ।
पाहि मां त्वं प्रभो तुभ्यं मणिमल्लारये नमः ॥ ७॥
कायेन मनसा वाचा येऽपराधा मया कृताः ।
तान्क्षमस्व प्रभो तुभ्यं मणिमल्लारये नमः ॥ ८॥
खण्डराजस्तुतिमिमां त्रिसन्ध्यं यः पठेद्द्विजः ।
सर्वान्कामान्स आप्त्वेह शिवलोके महीयते ॥ ९॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं श्रीखण्डराजस्तोत्रं सम्पूर्णम् ।

॥ श्रीकण्ठेशस्तोत्रम्॥

(श्रीगरलपुर आर्द्रोत्सवे)

श्रीगणेशाय नमः ॥

आर्द्रान्तःकरणस्त्वं यस्मादीशान भक्तवृन्देषु ।
आर्द्रोत्सवप्रियोऽतः श्रीकण्ठात्रास्ति नैव सन्देहः ॥ १॥
द्रष्टृस्तवोत्सवस्य हि लोकान्पापात्तथा मृत्योः ।
मा भीरस्त्विति शम्भो मध्येतिर्यग्गतागतैर्ब्रूषे ॥ २॥
प्रकरोति करुणयाऽऽर्द्रान् शम्भुर्नम्रानिति प्रबोधाय ।
धर्मोऽयं किल लोकानार्द्राङ्कुरुतेऽद्य गौरीश ॥ ३॥
आर्द्रा नटेशस्य मनोऽब्जवृत्तिरित्यर्थसम्बोधकृते जनानाम् ।
आर्द्रर्क्ष एवोत्सवमाह शस्तं पुराणजालं तव पार्वतीश ॥ ४॥

बाणार्चने भगवतः परमेश्वरस्य
प्रीतिर्भवेन्निरुपमेति यतः पुराणैः ।
सम्बोध्यते परशिवस्य यथान्धकं ततः
करोति बाणार्चनं जगति भक्तियुता जनालिः ॥ ५॥
यथान्धकं त्वं विनिहत्य शीघ्रं लोकस्य रक्षामकरोः कृपाब्धे ।
तथाज्ञतां मे विनिवार्य शीघ्रं विद्यां प्रयच्छाशु सभाधिनाथ ॥ ६॥
इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितं श्रीकण्ठेशस्तोत्रं सम्पूर्णम् ।

॥ श्रीकाशीविश्वनाथस्तुतिः॥

दुर्गाधीशो द्रुतिज्ञो द्रुतिनुतिविषयो दूरदृष्टिर्दुरीशो
दिव्यादिव्यैकराध्यो द्रुतिचरविषयो दूरवीक्षो दरिद्रः ।
देवैः सङ्कीर्तनीयो दलितदलदयादानदीक्षैकनिष्ठो
दानी दीनार्तिहारी भवदवदहनो दीयतां दृष्टिवृष्टिः ॥ १॥
क्षेत्रज्ञः क्षेत्रनिष्ठः क्षयकलितकलः क्षात्रवर्गैकसेव्यः
क्षेत्राधीशोऽक्षरात्मा क्षितिप्रथिकरणः क्षालितः क्षेत्रदृश्यः ।
क्षोण्या क्षीणोऽक्षरज्ञो क्षरपृथुकलितः क्षीणवीणैकगेयः
क्षौरः क्षोणीध्रवर्ण्यः क्षयतु मम बलक्षीणतां सक्षणं सः ॥ २॥
क्रूरः क्रूरैककर्मा कलितकलकलैः कीर्तनीयः कृतिज्ञः
कालः कालैककालो विकलितकर्णः कारणाक्रान्तकीर्तिः ।
कोपः कोपेऽप्यकुप्यन् कुपितकरकराघातकीलः कृतान्तः
कालव्यालालिमालः कलयतु कुशलं वः करालः कृपालुः ॥ ३॥
गौरी स्निह्यतु मोदतां गणपतिः शुण्डामृतं वर्षताद्
नन्दीशः शुभवृष्टिमावितनुतां श्रीमान् गणाधीश्वरः ।
वायुः सान्द्रसुखावहः प्रवहतां देवाः समृद्धादयाः
सम्पूर्तिं दधतां सुखस्य नितरां विश्वेश्वरः प्रीयताम् ॥ ४॥
श्रीविश्वेश्वरमन्दिरं प्रविलसेत् सम्पूर्णसिद्धं शुभं
पुष्टं तुष्टसुखाकरं प्रभवतां सम्मोदमोदावहम् ।
एतद्दर्शनकामना जगति सञ्जायेत सन्निन्दतः
सर्वेषां भगवान् महेश्वरकृपापूर्णो निरीक्षेत नः ॥ ५॥
इति काशीपीठाधीश्वरः श्रीमहेश्वरानन्दः विरचिता
श्रीकाशीविश्वनाथस्तुतिः समाप्ता ।

॥ कुळीराष्टकम् ॥

तवास्याराद्धारः कति मुनिवराः कत्यपि सुराः
तपस्या सन्नाहैः सुचिरममनोवाक्पथचरैः ।
अमीषां केषामप्यसुलभममुष्मै पदमदाः
कुळीरायोदारं शिव तव दया सा बलवती ॥ १॥
अकर्तुं कर्तुं वा भुवनमखिलं ये किल भव-
न्त्यलं ते पादान्ते पुरहर वलन्ते तव सुराः ।
कुटीरं कोटीरे त्वमहह कुळीराय कृतवान्
भवान् विश्वस्येष्टे तव पुनरधीष्टे हि करुणा ॥ २॥
तवारूढो मौळिं तदनधिगमव्रीळनमितां
चतुर्वक्त्रीं यस्त्वच्चरणसविधे पश्यति विधेः ।
कुळीरस्यास्यायं कुलिशभृदलक्ष्यश्शिवभव-
द्दया सेयं त्वामप्यधरितवती किं न कुरुताम् ॥ ३॥
श्रुतिस्मृत्यभ्यासो नयनिचयभूयः परिचयः
तथा तत्तत्कर्मव्यसनमपि शुष्कश्रमकृते ।
त्वयि स्वान्तं लग्नं न यदि यदि लग्नं तदियता
जिता कैवल्यश्रीः पुरहर कुळीरोऽत्र गमकः ॥ ४॥
तपोभिः प्राग्जन्मप्रकरपरिनम्रैः पुररिपो
तनौ यस्यां कस्यामपि स हि भवार्तिप्रतिभटः ।
त्वयि स्याद्धीबन्धस्तनुरचरमा सैव चरमा
कुळीरो ब्रूते तन्महिमपथविद्वद्गुरुनयम् ॥ ५॥

धियो धानं नाम त्वयि शिव चिदानन्द परमो-
न्मिषत्साम्राज्यश्रीकुरळरभसाकर्षकुतुकम् ।
कुळीरेण ज्ञातं कथमनधिगम्यं दिविषदां
दया ते स्वच्छन्दा प्रथयति न कस्मै किमथवा ॥ ६॥
तदुच्चत्वं नैच्यं त्वितरदिति लोकाः शिव मुधा
व्यवस्थामस्थाने विदधति च नन्दन्ति च मिथः।
कुळीरस्त्वन्मौळिस्थितिमसुलभामेत्य स भवत्-
कृपामुच्चत्वं तद्विरहमपि नैच्यं प्रथयति ॥ ७॥
कुळीरेशाख्यातिर्गिरिशकृपयोच्चैरुपहृता
तवेयं भक्तायोन्नतिवितरण श्रीगमनिका ।
भवद्भक्त्युन्मीलत्फलगरिमटीकास्थितिजुषा
कुळीरस्य ख्यात्या जगति सहचर्या विहरते ॥ ८॥
कुळीरेशस्तोत्रं त्वदनुपधिकानुग्रहभवं
पठेयुर्ये नित्यं शृणुयुरपि वा ये पुनरिदम् ।
प्रसादात्ते तेऽमी विधुत दुरितास्त्वय्यभिरताः
भवेयुर्निर्यत्नाधिगतसकलाभीप्सितफलाः ॥ ९॥
कर्कटकचन्द्रयोगः कर्कटकेशान मूर्ध्नि ते दृष्टः ।
कारय वृष्टिममोघां वारय
वर्षोपरोधदुर्योगम् ॥ १०॥

इति श्री श्रीधरवेङ्कटेशार्य विरचितं कुळीराष्टकं समाप्तम् ॥

॥ आरती भगवान श्रीशंकर ॥

जयति जयति जग-निवास, शंकर सुखकारी ॥
अजर अमर अज अरूप, सत चित आनंदरूप,
व्यापक ब्रह्मस्वरूप, भव! भव-भय-हारी ॥ जयति०॥
शोभित बिधुबाल भाल, सुरसरिमय जटाजाल,
तीन नयन अति विशाल, मदन-दहन-कारी ॥ जयति०॥
भक्तहेतु धरत शूल, करत कठिन शूल फूल,
हियकी सब हरत हूल, अचल शान्तिकारी ॥ जयति०॥
अमल अरुण चरण कमल, सफल करत काम सकल,
भक्ति-मुक्ति देत विमल, माया-भ्रम-टारी ॥ जयति०॥
कार्तिकेययुत गणेश, हिमतनया सह महेश,
राजत कैलास-देश, अकल कलाधारी ॥ जयति०॥
भूषण तन भूति व्याल, मुण्डमाल कर कपाल,
सिंह-चर्म हस्ति खाल, डमरू कर धारी ॥ जयति०॥
अशरण जन नित्य शरण, आशुतोष आर्तिहरण,
सब बिधि कल्याण-करण, जय जय त्रिपुरारी ॥ जयति०॥

॥ कल्पेश्वरस्तोत्रम्॥

(वसन्ततिलका वृत्तम्)

जीवेशविश्वसुरयक्षनृराक्षसाद्याः
यस्मिंस्थिताश्च खलु येन विचेष्टिताश्च ।
यस्मात्परं न च तथाऽपरमस्ति किञ्चित्
कल्पेश्वरं भवभयार्तिहरं प्रपद्ये ॥ १॥
यं निष्क्रियो विगतमायविभुः परेशः
नित्यो विकाररहितो निजविर्विकल्पः ।
एकोऽद्वितीय इति यच्छ्रुतया ब्रुवन्ति
कल्पेश्वरं भवभयार्तिहरं प्रपद्ये ॥ २॥
कल्पद्रुमं प्रणतभक्तहृदन्धकारं
मायाविलासमखिलं विनिवर्तयन्तम् ।
चित्सूर्यरूपममलं निजमात्मरूपं
कल्पेश्वरं भवभयार्तिहरं प्रपद्ये ॥ ३॥
इति श्रीमत् परमहंस परिव्राजकाचार्य सद्गुरु भगवता श्रीधरस्वामिना
विरचितं श्रीकल्पेश्वरस्तोत्रं सम्पूर्णम् ।

॥ श्रीकल्लेश्वरस्तोत्रम् ॥

(वसन्ततिलका वृत्तम्)

जीवेशविश्वसुरयक्षनृराक्षसाद्याः
यस्मिन् स्थिताश्च खलु येन विचेष्टिताश्च ।
यस्मात्परं न च तथाऽऽपरमस्ति किञ्चित्
कल्लेश्वरं भवभयार्तिहरं प्रपद्ये ॥ १॥
यो निष्क्रियो विगतमायविभुः परेशः
नित्यो विकाररहितो भुवि निर्विकल्पः ।
सत्योऽद्वितीय इति यं श्रुतयो ब्रुवन्ति
कल्लेश्वरं भवभयार्तिहरं प्रपद्ये ॥ २॥
कल्पद्रुमं प्रणतभक्तहृदन्धकारं
मायाविलासमखिलं विनिवर्तयन्तम् ।
चित्सूर्यरूपमखिलं विनिवर्तयन्तं
कल्लेश्वरं भवभयार्तिहरं प्रपद्ये ॥ ३॥
स्तोत्रं कल्लेश्वरस्येदं सत्कामितसुरद्रुमम् ।
पठन्ति ये नरास्तेषां भवबन्धोऽपि नश्यति ॥
इति श्रीमत् परमहंसपरिव्राजकाचार्य सद्गुरु भगवान्
श्रीधरस्वामीमहाराजविरचितं श्रीकल्लेश्वरस्तोत्रं सम्पूर्णम् ।

॥ अथ आर्तिहरस्तोत्रम् ॥

श्री शंभो मयि करुणाशिशिरां दृष्टिं दिशन् सुधावृष्टिम्।
सन्तापमपाकुरुमे मन्तापरमेश तव दयायाः स्याम् ॥ १॥
अवसीदामि यदार्तिभिरनुगुणमिदमोकसोंहसां खलु मे।
तव सन्नवसीदामि यदन्तकशासन नतत्तवानुगुणम् ॥ २॥
देव स्मरंति तव येतेषां स्मरतोऽपि नार्तिरितिकीर्तिम्।
कलयसि शिव पाहीतिक्रन्दन् सीदाम्यहं किमुचितमिदम् ॥ ३॥
आदिश्याघकृतौ मामन्तर्यामिन्नसावघात्मेति।
आर्तिषुमज्जयसे मां किंब्रूयां तवकृपैकपात्रमहम् ॥ ४॥
मन्दाग्रणीरहं तव मयि करुणां घटयितुं विबोनालम्।
आकृष्टुं तान्तु बलादलमिह मद्दैन्यमिति समाश्वसिति ॥ ५॥
त्वं सर्वज्ञोऽहं पुनरज्ञोऽनीशोहमीश्वरत्वमसि।
त्वं मयि दोषान् गणयसि किं कथये तुदति किं दया नत्वाम् ॥ ६॥
आश्रितमार्ततरं मामुपेक्षसे किमिति शिव न किं दयसे।
श्रितगोप्ता दीनार्तिहृदिति खलु शंसंति जगति सन्तस्त्वाम् ॥ ७॥
प्रहराहरेतिवादी फणितमदाख्य इति पालितो भवता।
शिव पाहीति वदोऽहं शृतो न किं क्वां कथं न पाल्यस्ते ॥ ८॥
शरणं व्रज शिवमार्तीस्सतव हरेदिति सतां गिराऽहम् त्वाम्।
शरणं गतोऽस्मि पालय खलमपि तेष्वीश पक्षपातान्माम् ॥ ९॥

इति श्री श्रीधरवेंकटेशार्यकृतिषु आर्तिहरस्तोत्रं संपूर्णम् ॥

॥ श्रीचिदम्बरेशस्तुतिः ॥

वन्दे शम्भुमुमापतिं सुरगुरुं वन्दे जगत्कारणं
वन्दे पन्नगभूषणं
मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्यशशाङ्कवह्निनयनं वन्दे मुकुन्दप्रियं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ १॥

वन्दे सर्वजगद्विहारमतुलं वन्दे करित्वग्धरं
वन्दे देवशिखामणिं
शशिनिभं वन्दे हरेर्वल्लभम् ।
वन्दे पर्वतकन्यकार्धवपुषं वन्दे परं चिन्मयं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ २॥

वन्दे व्योमसभापतिं नटपतिं वन्देऽर्कदन्तापहं
वन्दे निर्मलमादिभूतमनिशं
वन्दे मखध्वंसिनम् ।
वन्दे नित्यमगेन्द्रजाप्रियकरं
वन्देऽतिशान्ताकृतिं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ ३॥

वन्दे भूरथमम्बुजाक्षविशिखं
वन्दे त्रयीवाजिनं
वन्दे शैलशरासनं फणिगुणं
वन्देऽब्धितूणीरकम् ।
वन्दे पद्मजसारथिं पुरहरं वन्दे महाभैरवं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ ४॥

वन्दे पञ्चमुखाम्बुजं त्रिणयनं वन्दे ललाटेक्षणं
वन्दे व्योमकचं जटासुमकुटं
वन्देऽब्जगङ्गाधरम् ।
वन्दे मारहरं त्रिपुण्ड्रनिटिलं वन्देऽष्टमूर्त्यात्मकं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ ५॥

वन्दे राजतपर्वताग्रनिलयं वन्दे सुराधीश्वरं
वन्दे निर्गुणमप्रमेयममलं वन्दे यमद्वेषिणम् ।
वन्दे कुण्डलिराजकुण्डलधरं वन्दे सहस्राननं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ ६॥

वन्देऽनन्तरविप्रकाशमगुणं वन्देऽन्धकस्यान्तकं
वन्दे पद्मजविष्णुगर्वकुलिशं
वन्दे दयाम्भोनिधिम् ।
वन्दे चित्सभमीश्वरं सुरनुतं वन्दे त्रिमूर्त्यात्मकं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ ७॥

वन्देऽपस्मृतिशिक्षकं विषहरं वन्दे मृडं धूर्जटिं
वन्दे विप्रवरैस्सुपूजितपदं वन्दे भवोत्तारकम् ।
वन्दे धर्ममुखार्थदं श्रुतिनुतं वन्दे गुरूणां गुरुं
वन्दे भक्तजनाश्रयञ्च
वरदं वन्दे शिवं शङ्करम् ॥ ८॥

शार्दूलाङ्घ्रिमहर्षिणा
विरचितं सङ्कीर्तयेद्वन्दन-
स्तोत्रं तद्गतनामभिर्यजति
यश्शम्भुं सभायाः पतिम् ।
सन्ध्यासु प्रतिवासरं
सुनियतो धर्मादि सत्सम्पदो
लब्ध्वेहेन्दुकलाधरस्य
सचिवो भूत्वा स च क्रीडति ॥ ९॥

इति श्रीव्याघ्रपादमुनीन्द्रविरचितः श्रीचिदम्बरेश्वरवन्दनस्तवः सम्पूर्णः ।

| आरती भगवान कैलासवासी |

शीश गंग अर्धंग पार्वती, सदा विराजत कैलासी ।
नंदी भृंगी नृत्य करत हैं, धरत ध्यान सुर सुखरासी ॥
शीतल मन्द सुगन्ध पवन बह, बैठे हैं शिव अविनाशी ।
करत गान गन्धर्व सप्त स्वर, राग रागिनी मधुरा-सी ॥
यक्ष-रक्ष भैरव जहे डोलत, बोलत हैं वनके वासी ।
कोयल शब्द सुनावत सुन्दर, भ्रमर करत हैं गुंजा-सी ॥
कल्पद्रुम अरु पारिजात तरु, लाग रहे हैं लक्षासी ।
कामधेनु कोटिन जहँ डोलत, करत दुग्धकी वर्षा-सी ॥
सूर्यकान्त सम पर्वत शोभित, चन्द्रकान्त सम हिमराशी ।
नित्य छहों ऋतु रहत सुशोभित, सेवत सदा प्रकृति-दासी ॥
ऋषि-मुनि देव दनुज नित सेवत, गान करत श्रुति गुणराशी ।
ब्रह्मा-विष्णु निहारत निसिदिन, कछु शिव हमकूँ फरमासी ॥
ऋद्धि सिद्धिके दाता शंकर, नित सत् चित् आनँदराशी ।
जिनके सुमिरत ही कट जाती, कठिन काल-यमकी फाँसी ॥
त्रिशूलधरजीका नाम निरंतर, प्रेम सहित जो नर गासी ।
दूर होय विपदा उस नरकी, जन्म-जन्म शिवपद पासी ॥
कैलासी काशीके वासी, अविनाशी मेरी सुध लीजो ।
सेवक जान सदा चरननको, अपनो जान कृपा कीजो ॥
तुम तो प्रभुजी सदा दयामय, अवगुण मेरे सब ढकियो ।
सब अपराध क्षमाकर शंकर, किंकरको विनती सुनियो ॥

॥ त्रिमूर्तिस्तुतिः॥

नमस्त्रिमूर्तये तुभ्यं प्राक्सृष्टेः केवलात्मने ।
गुणत्रयविभागाय पश्चाद्भेदमुपेयुषे ॥ १॥
नमो विश्वसृजे पूर्वं विश्वं तदनु बिभ्रते ।
अथ विश्वस्य संहर्त्रे तुभ्यं त्रेधास्थितात्मने ॥ २॥
रजोजुषे जन्मनि सत्त्ववृत्तये स्थितौ
प्रजानां प्रलये तमःस्पृशे ।
अजाय सर्गस्थितिनाशहेतवे
त्रयीमयाय त्रिगुणात्मने नमः ॥ ३॥
श्यामश्वेतारुणाङ्गा
जलधरणिधरोत्फुल्लपङ्केरुहस्था
सोमासावित्र्युपेता रथचरणपिनाकोग्रहुङ्कारशस्त्राः ।
देवा द्वित्र्यष्टनेत्रा जगदवनसमुच्छेदनोत्पत्तिदीक्षाः
प्रीता वः पान्तु नित्यं
हरिहरविधयस्ताक्ष्र्यगोहंसपत्राः ॥ ४॥

इति त्रिमूर्तिस्तुतिः समाप्ता ।

भुजङ्गी छन्द

मनोबुद्ध्यहङ्कारचित्तानि नाहं न च श्रोत्रजिह्वे न च घ्राणनेत्रे ।
न च व्योमभूमिर्न तेजो न वायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ १॥
न च प्राणसंज्ञो न वै पञ्चवायुर्न वा सप्तधातुर्न वा पञ्चकोशः ।
न वाक्पाणिपादौ न चोपस्थपायुश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ २॥
न मे द्वेषरागौ न मे लोभमोहौ मदो नैव मे नैव मात्सर्यभावः । (न मे वै मदो)
न धर्मो न चार्थो न कामो न मोक्षश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ३॥
न पुण्यं न पापं न सौख्यं न दुःखं न मन्त्रो न तीर्थं न वेदा न यज्ञाः ।
अहं भोजनं नैव भोज्यं न भोक्ता चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ४॥
न मृत्युर्न शङ्का न मे जातिभेदः पिता नैव मे नैव माता न जन्म । (var न मे मृत्यु शङ्का)
न बन्धुर्न मित्रं गुरुर्नैव शिष्यश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ५॥
अहं निर्विकल्पो निराकाररूपो विभुर्व्याप्य सर्वत्र सर्वेन्द्रियाणाम् । (var विभुत्वाच्च)
सदा मे समत्वं न मुक्तिर्न बन्धश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६॥
(var न चासङ्गतं नैव मुक्तिर्न मेयश्चिदानन्दरूपः शिवोऽहं शिवोऽहम् ॥ ६॥)

॥ इति श्रीमच्छङ्कराचार्यविरचितं आत्मषट्कं सम्पूर्णम् ॥

गौरीपतिशतनामावलिः

बृहस्पतिरुवाच -

ॐ रुद्राय नमः । नीलाय । भीमाय । परमात्मने । कपर्दिने । सुरेशाय । व्योमकेशाय । वृषभध्वजाय । सोमाय । सोमनाथाय । शम्भवे । दिगम्बराय । भर्गाय । उमाकान्ताय । तपोमयाय । भव्याय । शिवाय । श्रेष्ठाय । विष्णवे । व्यालप्रियाय नमः । २०

ॐ व्यालाय नमः । व्यालानां पतये । महीधराय । व्याघ्राय । पशूनां पतये । पुरान्तकाय । सिंहाय । शार्दूलाय । मखाय । मीनाय । मीननाथाय । सिद्धाय । परमेष्ठिने । कामान्तकाय । बुद्धाय । बुद्धीनां पतये । कपोताय । विशिष्टाय । शिष्टाय । सकलात्मने नमः । ४०

ॐ वेदाय नमः । वेदजीवाय । वेदगुह्याय । दीर्घाय । दीर्घरूपाय । दीर्घार्थाय । अविनाशिने । जगत्प्रतिष्ठाय । व्योमरूपाय । गजासुरमहाकालाय । अन्धकासुरभेदिने । नीलरूपाय । लोहितरूपाय । शुक्लरूपाय । चण्डमुण्डप्रियाय । भक्तिप्रियाय । देवाय । ज्ञात्रे । ज्ञानिने । अव्ययाय नमः । ६०

ॐ महेशाय नमः । महादेवाय । हराय । त्रिनेत्राय । त्रिवेदाय । वेदाङ्गाय । अर्थाय । अर्थरूपाय । परमार्थाय । विश्वभूपाय । विश्वाय । विश्वनाथाय । शङ्कराय । कालाय । कालावयवरूपिणे । अरूपाय । विरूपाय । सूक्ष्मसूक्ष्माय । श्मशानवासिने । कृत्तिवाससे नमः । ८०

ॐ भूम्ने नमः । शशाङ्कशेखराय । ईशाय । उग्रभूमिशयाय । दुर्गाय । दुर्गपाराय । दुर्गावयवसाक्षिणे । लिङ्गरूपाय । लिङ्गाय । लिङ्गानां पतये । प्रलयरूपाय । प्रणवार्थाय । कारणकारणाय । मृत्युञ्जयाय । आत्मभवस्वरूपिणे । श्रीत्र्यम्बकाय । असितकण्ठाय । शर्वाय । गौरीपतये । सकलमङ्गलहेतवे नमः । १००

| अष्टमूर्तिस्तोत्रम् |

ईशा वास्यमिदं सर्वं चक्षोः सूर्यो अजायत ।
इति श्रुतिरुवाचातो महादेवः परावरः ॥ १॥
अष्टमूर्तेरसौ सूर्यौ मूर्तित्वं परिकल्पितः ।
नेत्रत्रिलोचनस्यैकमसौ सूर्यस्तदाश्रितः ॥ २॥
यस्य भासा सर्वमिदं विभातीदि श्रुतेरिमे ।
तमेव भान्तमीशानमनुभान्ति खगादयः ॥ ३॥
ईशानः सर्वविद्यानां भूतानां चेति च श्रुतेः ।
वेदादीनामप्यधीशः स ब्रह्मा कैर्न पूज्यते ॥ ४॥
यस्य संहारकाले तु न किञ्चिदवशिष्यते ।
सृष्टिकाले पुनः सर्वं स एकः सृजति प्रभुः ॥ ५॥
सूर्याचद्रमसौ धाता यथापूर्वमकल्पयत् ।
इति श्रुतेर्महादेवः श्रेष्ठोऽर्यः सकलाश्रितः ॥ ६॥
विश्वं भूतं भवद्भयं सर्वं रुद्रात्मकं श्रुतम् ।
मृत्युञ्जयस्तारकोऽतः स यज्ञस्य प्रसाधनः ॥ ७॥
विषमाक्षोऽपि समदृक् सशिवोऽपि शिवः स च ।
वृषसंस्थोऽध्यतिवृषो गुणात्माऽप्यगुगुणोऽमलः ॥ ८॥
यदाज्ञामुद्वहन्त्यत्र शिरसा सासुराः सुराः ।
अभ्रं वातो वर्षं इतीषवो यस्य स विश्वपाः ॥ ९॥
भिषक्रमं त्वा भिषजां शृणोमीति श्रुतेरवम् ।
स्वभक्तसंसारमहारोगहर्ताऽपि शङ्करः ॥ १०॥

इत्यष्टमूर्तिस्तोत्रं सम्पूर्णम् ।

॥ श्रीचिदम्बरेशस्तुतिः ॥

कल्याणमूर्तिं कनकाद्रिचापं
कान्तासमाक्रान्तनिजार्धदेहम् ।
कालान्तकं कामरिपुं पुरारिं
चिदम्बरेशं
हृदि भावयामि ॥ १॥

विश्वाधिकं विष्णुमुखैरुपास्यं
त्रिलोचनं चन्द्रकलावतंसम् ।
उमापतिं पापहरं प्रशान्तं
चिदम्बरेशं
हृदि भावयामि ॥ २॥

विश्वेश्वरं नित्यमनन्तरूपं
बालेन्दुचूडं सुरवन्द्यपादम् ।
पतिं पशूनां हृदि सन्निविष्टं
चिदम्बरेशं
हृदि भावयामि ॥ ३॥

विशालनेत्रं परिपूर्णगात्रं
गौरीकलत्रं सुरवैरिशत्रुम् ।
कुबेरमित्रं जगदेकपात्रं
चिदम्बरेशं
हृदि भावयामि ॥ ४॥

कैलासवासं जगतामधीशं
मुरारिमित्रं पुरुहूतवन्द्यम् ।
महेशमूर्तिं सुरसेव्यमानं
चिदम्बरेशं
हृदि भावयामि ॥ ५॥

कर्पूरगात्रं कमनीयपात्रं
कंसारिमित्रं कमलेन्दुवक्त्रम् ।
कन्दर्पशत्रुं कमलेशमित्रं
चिदम्बरेशं
हृदि भावयामि ॥ ६॥

त्वमेव बन्धुस्त्वयि भाति सर्वं
अनेकरूपं परमन्त्रमेकम् ।
पिनाकपाणिं भयनाशहेतुं
चिदम्बरेशं
हृदि भावयामि ॥ ७॥

कृपासमुद्रं सुमुखं त्रिनेत्रं
जटाधरं पार्वतिवामभागम् ।
सदाशिवं रुद्रमनन्तरूपं
चिदम्बरेशं
हृदि भावयामि ॥ ८॥

॥ इति श्रीचिदम्बरेशस्तुतिः सम्पूर्णा ॥

| श्री अष्टप्रासाष्टकम् |

शक्राद्यामरसन्नुताङ्घ्रियुगलं चक्रायुधाद्यर्चितं
नक्रग्रस्तशिशुप्रदानचतुरं शुक्राविसोमाक्षिकम् ।
विक्रान्तं श्रुतिमस्तकेषु चरणाब्जाक्रान्तयम्याशयं
चक्रारिष्टरसाशताङ्गसुमहच्चक्रं ? महेशं भजे ॥ १॥
अष्टात्मानमपारसंसृतिदवप्लुष्टात्मनां शान्तिदं
शिष्टान्विष्टपदारविन्दमुमया श्लिष्टाङ्गमत्याशया ।
दिष्टान्तानभियुक्तमौनितनयं कष्टापहं सेवता-
मिष्टं सज्जनसंहतेर्विधिसमादिष्टात्मकाङ्घ्रिं भजे ॥ २॥
शृङ्गारामितलोलमद्रिसुतया सङ्गं वृषे गामिनं
गङ्गाचन्द्रजटाविराजिमकुटं पिङ्गाननातिप्रियम् ।
अङ्गासङ्गितमन्मथा बहुकृपापाङ्गं त्रिशूलायुधं
लिङ्गार्चापरदत्तसर्वपुरुषार्थं गेयवीर्यं भजे ॥ ३॥
कुण्ठं भक्तजनाहितस्य परमोत्कण्ठास्पदं स्वस्त्रियः
कण्ठालङ्कृतनागमाशुगि(जि)तवैकुण्ठाधिपं शङ्करम् ।
कण्ठस्थापितकालकूटविषमुत्कण्ठादिषट्कापहं
कुण्ठात्मानभिगम्यमानचरितं कण्ठातिनीलं भजे ॥ ४॥
अण्डानामखिलस्य नाथमुडुराट्कुण्डं कृपासागरं
शुण्डावक्त्रमुखोग्रपाण्ड्यजनकं दण्डायुधारिं शिवम् ।
काण्डाकारितवेदफेरु(रूप)ममरोद्दण्डं पुरद्वेषिणं
चण्डीप्राणपतिं सुधाशनपतेः शुण्डावदर्च्यं भजे ॥ ५॥
हिक्कामुख्यगदाधितापपटलीधिक्कारिदिव्याह्वयं
ढक्कादुन्दुभिकाहलाद्यविरमसृक्काबृहत्कुक्षिखं (?) ।
ढक्कामद्रुहमीशितारमतसी सृक्कालिमग्रीवमुं
त्वक्कायच्छदमीदृशं खनिजभान्यक्कारिदेहं भजे (?) ॥ ६॥
भर्गाख्यं परमेश्वरं त्रिजगतां सर्गादिहेतुं मृडं
दुर्गाधीशमनन्तमेकमजरं दुर्गापहं ध्यायताम् ।
गर्गागस्त्यवसिष्ठमुख्यसुतपद्वर्गान्तरङ्गालयं
स्वर्गानोकहमर्थिनां पशुपतिं स्वर्गामिवन्द्यं भजे ॥ ७॥
वित्ताधीशसखं विशालनिटिलं सत्तामयं शाश्वतं
चित्तादत्म्यददिव्यनामविभवं चित्ताधिजाताहितम् ।
मत्तानेकपगामिनं प्रणवसंवित्तास्वरूपं भवं
मत्ताहीनसुबोधगोचरमलं मत्तापहाङ्घ्रिं भजे ॥ ८॥
अष्टप्रासाष्टकं शम्भोरिष्टं भक्त्या पठन्ति ये ।
इष्टा भवन्ति श्रीगन्धपुष्टिकाननवासिनः ॥ ९॥

॥ इति श्रीअष्टप्रासाष्टकं सम्पूर्णम् ॥

॥ श्रीकण्ठेशस्तुतिः ॥

(शिष्याशीर्वचनात्मकस्तवः)

श्रीशाम्भोजभवादिमामरगणप्रस्तूयमानागजा-
चित्ताम्भोरुहबालवासरपते कारुण्यवारान्निधे ।
श्रीविद्याप्रदपादपङ्कजसकृत्प्राणम्रलोकालये
श्रीकण्ठेश महाप्रभोऽव ससुतं श्रीचामराजप्रभुम् ॥ १॥
पापाम्भोनिधिबाडवप्रविलसज्ज्योत्स्नाभदेहच्छवे
कालाहङ्कृतिवारणव्रतविधिप्रावीण्यभाक्शङ्कर ।
प्राणायामपरायणैर्मुनिवरैः सञ्चिन्त्यमूर्तेऽनिशं
श्रीकण्ठेश महाप्रभोऽव ससुतं श्रीचामराजप्रभुम् ॥ २॥
श्रीमच्छङ्करदेशिकेन्द्ररचितव्याख्यानसिंहासना-
धीशश्रीनरसिंहभारतिकराम्भोजार्चिताङ्घ्रिद्वय ।
श्रीवाणीपरिसेविताागतनयासंशोभिताङ्कस्थल
श्रीकण्ठेश महाप्रभोऽव ससुतं श्रीचामराजप्रभुम् ॥ ३॥
हस्त्यश्वादिसमस्तमङ्गनिवहं प्रापय्य वृद्धिं परां
हस्तीन्द्राननकार्तिकेयविलसत्पार्श्वद्वय प्रेमतः ।
दारामात्यसुमित्रबन्धुसहितं श्रीकृष्णराजात्मजं
श्रीकण्ठेश महाप्रभोऽव ससुतं श्रीचामराजप्रभुम् ॥ ४॥
विद्यावृद्धिकृते सभा बहुविधा निर्माय तत्राग्रिमं
दत्त्वा वेतनमादरात्सुविदुषः संस्थाप्य देशे स्वके ।
अध्येतॄन् परिपोषयन्तमनिशं दत्त्वाशनाच्छादने
श्रीकण्ठेश महाप्रभोऽव ससुतं श्रीचामराजप्रभुम् ॥ ५॥
गौरीनाथरमाधवाङ्घ्रिसरसीसञ्जातशृङ्गायित-
स्वान्तं मन्मथगर्वहारिवपुषं कारुण्यरत्नाकरम् ।
देवब्राह्मणभक्तिजन्मसदनं वाणीविलासाश्रयं
श्रीकण्ठेश महाप्रभोऽव ससुतं श्रीचामराजप्रभुम् ॥ ६॥
इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचिता श्रीकण्ठेशस्तुतिः समाप्ता ।

जन्मसागरोत्तारणस्तोत्रम्

श्रीगणेशाय नमः ॥

श्रीरामपूजितपदाम्बुज चापपाणे
श्रीचक्रराजकृतवास कृपाम्बुराशे ।
श्रीसेतुमूलचरणप्रवणान्तरङ्ग
श्रीरामनाथ लघु तारय जन्मवार्धिम् ॥ १॥

नम्राघवृन्दविनिवारणबद्धदीक्ष
शैलाधिराजतनयापरिरब्धवर्ष्मन् ।
श्रीनाथमुख्यसुरवर्यनिषेविताङ्घ्रे
श्रीरामनाथ लघु तारय जन्मवार्धिम् ॥ २॥

शूराहितेभवदनाश्रितपार्श्वभाग
क्रूरारिवर्गविजयप्रद शीघ्रमेव ।
साराखिलागमतदन्तपुराणपङ्क्तेः
श्रीरामनाथ लघु तारय जन्मवार्धिम्॥ ३॥

शब्दादिमेषु विषयेषु समीपगेष्व-
प्यासक्तिगन्धरहितान्निजपादनम्रान् ।
कुर्वाण कामदहनाक्षिलसल्ललाट
श्रीरामनाथ लघु तारय जन्मवार्धिम् ॥ ४॥

इति जन्मसागरोत्तारणस्तोत्रं सम्पूर्णम् ।

| अष्टमूर्तिस्तुतिः |

क्षितिमूर्ते नमस्तुभ्यं जाता निक्षिति कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ १॥
जलमूर्ते नमस्तुभ्यं जाता निजलकर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ २॥
वह्निमूर्ते नमस्तुभ्यं जाता निवह्नि कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ३॥
वायुमूर्ते नमस्तुभ्यं जाता निस्पर्श कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ४॥
व्योममूर्ते नमस्तुभ्यं जाता निव्योम कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ५॥
चन्द्रमूर्ते नमस्तुभ्यं जाता निस्वान्त कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ६॥
सूर्यमूर्ते नमस्तुभ्यं जाता निदृश्य कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ७॥
यष्टृमूर्ते नमस्तुभ्यं जाता नियम्य कर्मसु ।
मयितिष्ठन्ति पापानि तानि नाशय शङ्कर ॥ ८॥
अष्टमूर्तेस्स्तुतिमिमां यः पठेच्छिवसन्निधौ ।
किल्बिषादखिलान्मुक्तस्स्वर्गं मोक्षञ्चविन्दति ॥ ९॥

इत्यष्टमूर्ति स्तुतिः ॥

।। श्रीमदृष्यशृङ्गेश्वरस्तुतिः ।।

श्रीगणेशाय नमः ।।

कष्टारिवर्गदलनशिष्टालिसमर्चिताङ्घ्रिपाथोजम् ।
नष्टाविद्यैर्गम्यं पुष्टात्माराधकालिमाकलये ।। १।।
प्राणायामैर्ध्यानैर्नष्टं चित्तं विधाय मुनिवर्याः ।
यत्पश्यन्ति हृदब्जे शान्ताभाग्यं नमामि तत्किञ्चित् ।। २।।
वेदोत्तमाङ्गगेयं नादोपास्त्यादिसाधनात्माख्यम् ।
खेदोन्मूलनदक्षं भेदोपाध्यादिवर्जितं नौमि ।। ३।।
शान्तामानसहंसं कान्तारासक्तमुनिवरैः सेव्यम् ।
शान्ताहङ्कृतिवेद्यं कान्तार्धं नौमि शृङ्गशिवम् ।। ४।।
इति श्रीमदृष्यशृङ्गेश्वरस्तुतिः सम्पूर्णा ।

| अमरेश्वरस्तोत्रम् |

कृष्णावेणीतटावास तृष्णाहृत्तुष्टमानस ।
त्रासहारिमहावीर त्राहि माममरेश्वर ॥ १॥
आन्ध्रदेशकृतावास चान्तरस्थमहारस ।
दुःखान्महाशक्तिधर त्राहि माममरेश्वर ॥ २॥
श्रीधान्यवाटिकाक्षेत्ररञ्जनानर्थभञ्जन ।
जननान्तत्रासहर त्राहि माममरेश्वर ॥ ३॥
नानोत्पातप्रशमन मनःशान्तिदचिन्तन ।
अधिष्ठितामरपुर त्राहि माममरेश्वर ॥ ४॥
चामुण्डाशक्तिसहित पराजितनिजाहित ।
हितकारिन् महाधीर त्राहि माममरेश्वर ॥ ५॥
प्रणवेशादिभिः पञ्चलिङ्गैस्त्वां सहितं न च ।
पश्यतां भीररिहर त्राहि माममरेश्वर ॥ ६॥
अमरावत्याधिष्ठानममरारिनिषूदनम् ।
वन्दे त्वामखिलाधार त्राहि माममरेश्वर ॥ ७॥
सदा ममास्तु योगस्ते त्वदर्थं मेऽपि सद्व्रते ।
देहोऽयं तिष्ठतु हर त्राहि माममरेश्वर ॥ ८॥
प्रसीद पार्वतीजाने न जानेऽहं शुभाशुभम् ।
स्मरामि त्वां स्मरहरे त्राहि माममरेश्वर ॥ ९॥
अपराधान्मानसिकान्कायिकानपि वाचिकान् ।
क्षमस्व स्वजनाधार त्राहि माममरेश्वर ॥ १०॥
दोषा अशेषा मम ये ते नश्यन्तु सदाऽभये ।
त्वय्यस्तु हृदयं तार त्राहि माममरेश्वर ॥ ११॥

इति श्रीवासुदेवानन्दसरस्वतीविरचितं श्रीमदमरेश्वरस्तोत्रं सम्पूर्णम् ।

॥ श्रीकण्ठाष्टकम्॥

(श्रीगरलपुरे)

श्रीगणेशाय नमः ॥

यः पादपपिहिततनुः प्रकाशतां परशुरामेण ।
नीतः सोऽव्यात्सततं श्रीकण्ठः पादनम्रकल्पतरुः ॥ १॥
यः कालं जितगर्वं कृत्वा क्षणतो मृकण्डुमुनिसूनुम् ।
निर्भयमकरोत्सोऽव्याच्छ्रीकण्ठः पादनम्रकल्पतरुः ॥ २॥
कुष्ठापस्मारमुखा रोगा यत्पादसेवनात्सहसा ।
प्रशमं प्रयान्ति सोऽव्याच्छ्रीकण्ठः पादनम्रकल्पतरुः ॥ ३॥
यदविद्यैव जगदिदमखिलं प्रतिभाति सत्यवत्पूर्वम् ।
ज्ञानात्सोऽव्यात्सततं श्रीकण्ठः पादनम्रकल्पतरुः ॥ ४॥
यमिवृन्दवन्द्यचरणः कमिता धरणीधरेन्द्रतनयायाः ।
श्रीशादिवन्दितोऽव्याच्छ्रीकण्ठः पादनम्रकल्पतरुः ॥ ५॥
यो दक्षिणास्यरूपं धृत्वा विज्ञानदानकृतदीक्षः ।
मुग्धेभ्योऽपि स पायाच्छ्रीकण्ठः पादनम्रकल्पतरुः ॥ ६॥
अन्धोऽपि यत्करुणया चक्षुष्मान्भवति सत्वरं लोके ।
करुणानिधिः स पायाच्छ्रीकण्ठः पादनम्रकल्पतरुः ॥ ७॥
कपिलातटादृतगतिः कपिलादिमुनीन्द्रवन्द्यपदपद्मः ।
श्रीदः पायात्सततं श्रीकण्ठः पादनम्रकल्पतरुः ॥ ८॥
श्रीकण्ठाष्टकमेतत्पठति जनो यः कृतादरः सततम् ।
श्रीविद्यासदनं स प्रभवेन्नैवात्र सन्देहः ॥ ९॥

इति शृङ्गेरि श्रीजगद्गुरु श्रीसच्चिदानन्दशिवाभिनवनृसिंह-
भारतीस्वामिभिः विरचितं श्रीकण्ठाष्टकं सम्पूर्णम् ।

। शिवाष्टक स्तोत्र ।

शरीरं सुरूपं तथा वा कलत्रं यशश्चारु चित्रं धनं मेरुतुल्यं
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।।1
कलत्रं धनं पुत्रपौत्रादि सर्वं गृहं बान्धवाः सर्वमेतद्धि जातम्
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।।2
षडङ्गादिवेदो मुखे शास्त्रविद्या कवित्वादि गद्यं सुपद्यं करोति
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।। 3
विदेशेषु मान्यः स्वदेशेषु धन्यः सदाचारवृत्तेषु मत्तो न चान्यः
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।।4
क्षमामण्डले भूपभूपालवृन्दैः सदासेवितं यस्य पादारविन्दं
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।।5
यशो मे गतं दिक्षु दानप्रतापा जगद्वस्तु सर्वं करे यत्प्रसादात्
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।। 6
न भोगे न योगे न वा वाजिराजौ न कान्तामुखे नैव वित्तेषु चित्तं
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।।7
अरण्ये न वा स्वस्य गेहे न कार्ये न देहे मनो वर्तते मे त्वनर्घ्ये
मनश्चेन लग्नं गुरोरङ्घ्रिपद्मे ततः किं ततः किं ततः किं ततः किं ।।8
गुरोरष्टकं यः पठेत्पुण्यदेही यतिर्भूपतिर्ब्रह्मचारी च गेही
लभेद्वाञ्छितार्थं पदं ब्रह्मसंज्ञं गुरोरुक्तवाक्ये मनो यस्य लग्नं ।

॥ आत्मनाथस्तुतिः विष्णुकृता ॥

अणीयांसमाद्यं महीयांसमीशं
हृदन्तस्सरोजान्तरस्थं तटस्थम् ।
अनन्तं ह्यचिन्त्यं विचिन्त्यस्वरूपं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ १

सदानन्दकन्दं चिदानन्दमूलं
महानन्दरूपं महेशं गिरीशम् ।
अगम्यं हि तर्कैः सुगम्यं मुनीन्द्रैः
सदा कुन्दमूलेश्वरं सन्नमामि ॥ २॥

प्रपञ्चातिरिक्तं प्रपञ्चस्वरूपं
जगत्प्राणरूपं जगत्त्राणधीरम् ।
स्वकुक्षिस्थलोकं जगत्साक्षिणं तं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ३॥

निराकारमच्छं निरीहैर्निरीक्ष्यं
निजं निर्मतं निर्मलं धर्मरूपम् ।
निराकारमोङ्कारमाद्यं ह्यभेद्यं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ४॥

समस्तं समाकृष्य लीनं च काले
विसृज्याथ सर्वं यथावत्सृजन्तम् ।
हृदन्तः प्रविश्याथ सर्वं नटन्तं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ५॥

गुणातीतमीड्यं गुणानां निदानं
जगन्मूलकन्दं जगद्देशिकं तम् ।
भुजङ्गेशहारं त्रयीसारसारं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ६॥

वहन्तं करैर्वह्निसृक्पुस्तकानि
भुजङ्गं वरं चाभयं दोः स्थलैश्च ।
चतुर्भिस्त्रिणेत्रान्वितं दक्षिणास्यं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ७॥

विशुद्धं प्रसिद्धं त्वसिद्धातिदूरं
विशुद्धान्तरङ्गे सदा संवसन्तम् ।
नितान्तं नटन्तं कृतान्तं हरं तं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ८॥

वटस्थं वरिष्ठं दृढस्थं गरिष्ठं
कुलीनं धुरीणं प्रवीणं पुराणम् ।
सुमोदं सुनादं सुवेदैकवादं
सदा कुन्दमूलेश्वरं सन्नमामि ॥ ९॥

सदानन्दसम्पूर्णमोदावहं तं
हरिप्रोक्तमीशस्य रत्नस्तवं यः ।
सकृद्वापि यत्र स्थितो वापि मर्त्यः
पठेद्भक्तितः सच्चिदानन्दभाग् स्यात् ॥ १०॥

इति श्रीविष्णुकृता आत्मनाथस्तुतिः समाप्ता ।

| अनादिकल्पेश्वरस्तोत्रम् |

कर्पूरगौरो भुजगेन्द्रहारो गङ्गाधरो लोकहितावहः सः ।
सर्वेश्वरो देववरोऽप्यघोरो योऽनादिकल्पेश्वर एव सोऽसौ ॥ १॥
कैलासवासी गिरिजाविलासी श्मशानवासी सुमनोनिवासी ।
काशीनिवासी विजयप्रकाशी योऽनादिकल्पेश्वर एव सोऽसौ ॥ २॥
त्रिशूलधारी भवदुःखहारी कन्दर्पवैरी रजनीशधारी ।
कपर्दधारी भजकानुसारी योऽनादिकल्पेश्वर एव सोऽसौ ॥ ३॥
लोकाधिनाथः प्रमथाधिनाथः कैवल्यनाथः श्रुतिशास्त्रनाथः ।
विद्यार्थनाथः पुरुषार्थनाथो योऽनादिकल्पेश्वर एव सोऽसौ ॥ ४॥
लिङ्गं परिच्छेत्तुमधोगतस्य नारायणश्चोपरि लोकनाथः ।
बभूवतुस्तावपि नो समर्थौ योऽनादिकल्पेश्वर एव सोऽसौ ॥ ५॥
यं रावणस्ताण्डवकौशलेन गीतेन चातोषयदस्य सोऽत्र ।
कृपाकटाक्षेण समृद्धिमाप योऽनादिकल्पेश्वर एव सोऽसौ ॥ ६॥
सकृच्च बाणोऽवनमय्य शीर्षं यस्याग्रतः सोऽप्यलभत्समृद्धिम् ।
देवेन्द्रसम्पत्त्यधिकां गरिष्ठां योऽनादिकल्पेश्वर एव सोऽसौ ॥ ७॥
गुणान्विमातुं न समर्थ एष वेषश्च जीवोऽपि विकुण्ठितोऽस्य ।
श्रुतिश्च नूनं चकितं बभाषे योऽनादिकल्पेश्वर एव सोऽसौ ॥ ८॥
अनादिकल्पेश उमेश एतत्स्तवाष्टकं यः पठति त्रिकालम् ।
स धौतपापोऽखिललोकवन्द्यं शैवं पदं यास्यति भक्तिमांश्चेत् ॥ ९॥
इति श्रीवासुदेवानन्दसरस्वतीकृतं अनादिकल्पेश्वरस्तोत्रं सम्पूर्णम् ।

॥ अथ आर्तिहरस्तोत्रम् ॥

श्री शंभो मयि करुणाशिशिरां दृष्टिं दिशन् सुधावृष्टिम् ।
सन्तापमपाकुरुमे मन्तापरमेश तव दयायाः स्याम् ॥ १॥
अवसीदामि यदार्तिभिरनुगुणमिदमोकसोंहसां खलु मे ।
तव सन्नवसीदामि यदन्तकशासन नतत्तवानुगुणम् ॥ २॥
देव स्मरंति तव येतेषां स्मरतोऽपि नार्तिरितिकीर्तिम् ।
कलयसि शिव पाहीतिक्रन्दन् सीदाम्यहं किमुचितमिदम् ॥ ३॥
आदिश्याघकृतौ मामन्तर्यामिन्नसावघात्मेति ।
आर्तिषुमज्जयसे मां किंब्रूयां तवकृपैकपात्रमहम् ॥ ४॥
मन्दाग्रणीरहं तव मयि करुणां घटयितुं विबोनालम् ।
आकृष्टुं तान्तु बलादलमिह मद्दैन्यमिति समाश्वसिति ॥ ५॥
त्वं सर्वज्ञोऽहं पुनरज्ञोऽनीशोहमीश्वरत्वमसि ।
त्वं मयि दोषान् गणयसि किं कथये तुदति किं दया नत्वाम् ॥ ६॥
आश्रितमार्ततरं मामुपेक्षसे किमिति शिव न किं दयसे ।
श्रितगोप्ता दीनार्तिहृदिति खलु शंसंति जगति सन्तस्त्वाम् ॥ ७॥
प्रहराहरेतिवादी फणितमदाख्य इति पालितो भवता ।
शिव पाहीति वदोऽहं शृतो न किं क्वां कथं न पाल्यस्ते ॥ ८॥
शरणं व्रज शिवमार्तीस्सतव हरेदिति सतां गिराऽहम् त्वाम् ।
शरणं गतोऽस्मि पालय खलमपि तेष्वीश पक्षपातान्माम् ॥ ९॥
इति श्री श्रीधरवेंकटेशार्यकृतिषु आर्तिहरस्तोत्रं संपूर्णम् ॥

श्री अगस्त्येशलिङ्गाष्टकम्

श्रीमत्पर्वतपुत्रिकाश्रितलसद्वामाङ्गमिन्दूज्ज्वल-
त्कोटीरं कनकाद्रिकार्मुकधरं कल्पद्रुमालावली-
सक्तोरःस्थलमन्तकान्तकमनन्ताहीन्द्रसद्भूषणं
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ १॥

भक्ताभीष्टफलप्रदं भवहरं पापौघविच्छेदनं
शक्राद्यष्टदिगीशसन्नुतपदं शुम्भद्गणाधीश्वरम् ।
गङ्गोत्तुङ्गतरङ्गिणीयुतजटाजूटं मुनीन्द्रार्चितं
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ २॥

मार्कण्डेयमुनीन्द्ररक्षणमजं मृत्युञ्जयं शाश्वतं
मत्तामर्त्यविरोधिगर्वनगरीदम्भोलिधारायितम् ।
वित्ताधीशसखं वियत्तललसत्केशं त्रिलोकेश्वरं
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ ३॥

भूम्यापोऽग्निसमीरणा(प्रभञ्जना)म्बरलसत्सोमार्कयज्वा(स्वात्मा)भिधै-
रष्टैरिष्टवरप्रदानचतुरैः स्पष्टैः स्वरूपैः सदा ।
भास्वन्तं जगतीतले गजहरं कर्पूरगौरं शिवं
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ ४॥

सूर्याग्नीन्दुविलोचनं सुरवरं फालाग्निभस्मीकृत-
प्रद्युम्नं परमेश्वरं गुरुवरं कालाग्निरुद्रं हरम् ।
कण्ठाकल्पविलासभासुरमहाहालाहलं शङ्करं
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ ५॥

श्रीमद्भूमिरथं विरिञ्चिविलसत्सूतं नगाधीशस-
च्चापं विष्णुशरं रथाङ्गयुगलीभूतार्कचन्द्रं शिवम् ।
पूर्वामर्त्यपुरत्रयान्तकरणोद्युक्तं शिवालिङ्गितं
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ ६॥

दक्षाक्षुद्रमखागतामरगणान् तत्रत्यऋत्विग्वरान्
चन्द्रं तच्छ्वशुरं भगं मुनिगणानग्निं च दक्षं लसत् ।
स्वेदोद्भूतविनीलदेहरुचिना वीरेण सन्त्रासितं(त्रासकं)
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ ७॥

श्रीलक्ष्मीशविरिञ्चिपूजितपदं शुम्भत्त्रिशूलायुधं
श्रीमद्भृङ्गिकुमारनन्दिगणपश्रीवीरभद्रादिभिः ।
सर्वैर्भक्तियुतैर्महागणवरैः संसेव्यमानं सदा
श्रीगुण्टूरिपुराधिवासमतुलागस्त्येशलिङ्गं भजे ॥ ८॥

श्रीकोप्पराजकुलवार्धिनिशाकरेण
स्तोत्रं कृतं जगति सुब्बयनामभाजा-
गस्त्येश्वरस्य निजभक्तजनावनस्य
यो वै पठेल्लभति सोऽपि सदा विमुक्तिम् ॥ ९॥

॥ इति श्रीअगस्त्येशलिङ्गाष्टकं सम्पूर्णम् ॥

श्रीचिदम्बराष्टकम्

(सप्तैव श्लोकाः मातृकायां सन्ति)

चित्तजान्तकं चित्स्वरूपिणं चन्द्रमृगधरं चर्मप्रिय(चर्मभी)करम् ।
चतुरभाषणं चिन्मयं गुरुं भज चिदम्बरं भावनास्थितम् ॥ १॥

दक्षमर्दनं दैवशासनं द्विजहिते रतं दोषभञ्जनम् ।
दुःखनाशनं दुरितशासनं भज चिदम्बरं भावनास्थितम् ॥ २॥

बद्धपञ्चकं बहुलशोभितं बुधवरैर्नुतं भस्मभूषितम् ।
भावयुक्स्तुतं बन्धुभिः स्तुतं भज चिदम्बरं भावनास्थितम् ॥ ३॥

दीनतत्परं दिव्यवचनदं दी(र)क्षितापदं दिव्यतेजसम् ।
दीर्घशोभितं देहतत्त्वदं भज चिदम्बरं भावनास्थितम् ॥ ४॥

क्षितितलोद्भवं क्षेमसम्भवं क्षीणमानवं क्षिप्रसद्यवम् ।
क्षेमदात्रवं क्षेत्रगौरवं भज चिदम्बरं भावनास्थितम् ॥ ५॥

तक्षभूषणं तत्त्वसाक्षिणं यक्षसागणं भिक्षुरूपिणम् ।
भस्मपोषणं व्यक्तरूपिणं भज चिदम्बरं भावनास्थितम् ॥ ६॥

यस्तु जापिकं चिदम्बराष्टकं पठति नित्यकं पापहं सुखम् ।
कठिनतारकं घटकुलाधिकं भज चिदम्बरं भावनास्थितम् ॥ ७॥

॥ इति श्रीचिदम्बराष्टकं सम्पूर्णम् ॥

| आत्मनाथध्यानम् |

दशशतदलपद्मे संस्थमानन्दकन्दं
विधिहरिगिरिशैक्यं विद्युदुद्भासमानम् ।
प्रणवमयमतर्क्यं सूक्ष्मसूक्ष्मं महान्तं
शिवपुरनिलयं तं चिन्तयाम्यात्मनाथम् ॥
आदौ धातृहरीश्वरस्थितिकरी वेदागमोद्धारिणी
योगाध्वादिरताऽद्रिजेप्सितकरीक्षाऽदेवसंहारिणी ।
सन्दिग्धावनिनिश्चये नृपतये वाजीप्रदात्री शिवैः
क्रीडन्ती द्विजभक्तिमुक्तिघटिनी
ह्यात्मेशलीलागतिः ॥
इति आत्मनाथध्यानं सम्पूर्णम् ।

॥ श्रीमदानन्दनटराजाष्टोत्तरशतनामावलिः ॥

ॐ चिदम्बरेश्वराय नमः । शम्भवे नमः । नटेशाय नमः ।
नटनप्रियाय नमः । अपस्मारहराय नमः । हंसाय नमः । नृत्तराजाय नमः । सभापतये नमः ।
पुण्डरीकपुराधीशाय नमः । श्रीमद्धेम सभेश्वराय नमः । शिवाय नमः । चिदम्बरमनवे नमः । मन्त्रमूर्तये नमः । हरिप्रियाय नमः । द्वादशान्तस्थिताय
नमः । नृत्ताय नमः । नृत्तमूर्तये नमः । परात्पराय नमः । परानन्दाय नमः । परं (परस्मै) ज्योतिषे नमः । २० । ॐ आनन्दाय
नमः । विबुधेश्वराय नमः । परप्रकाशाय नमः । नृत्ताङ्गाय नमः । नृत्तपादाय नमः । त्रिलोचनाय नमः । व्याघ्रपाद प्रियाय नमः ।
मन्त्रराजाय नमः । तिल्ववनेश्वराय नमः । हराय नमः । रत्नसभानाथाय नमः ।
पतञ्जलिवरप्रदाय नमः । मन्त्रविग्रहाय नमः । ओङ्काराय नमः । शङ्कराय नमः । चन्द्रशेखराय
नमः । नीलकण्ठाय नमः । ललाटाक्षाय नमः । वह्निहस्ताय नमः । महेश्वराय नमः । ४० । ॐ आनन्दताण्डवाय
नमः । श्वेताय नमः । गङ्गाधराय नमः । जटाधराय नमः । चक्रेशाय
नमः । कुञ्चितपदाय नमः । श्रीचक्राङ्गाय नमः । अभयप्रदाय नमः । मणिनूपुरपादाब्जाय
नमः । त्रिपुरावल्लभेश्वराय नमः । बीजहस्ताय नमः । चक्रनाथाय नमः ।
बिन्दुत्रैकोणवासकाय नमः । पाञ्चभौतिकदेहाङ्गाय नमः । परमानन्दताण्डवाय नमः । भुजङ्गभूषणाय
नमः । पञ्चदशाक्षरमनोहराय नमः । विश्वेश्वराय नमः । विरूपाक्षाय
नमः । विश्वातीताय नमः । ६० । ॐ जगद्गुरवे नमः । त्रिचत्वारिंशत्कोणाङ्गाय
नमः । प्रभाचक्रेश्वराय नमः । प्रभवे नमः । नवावरणचक्रेशाय नमः । नवचक्रेश्वरीप्रियाय
नमः । नाट्येश्वराय नमः । सभानाथाय नमः । सिंहवर्मप्रपूजिताय
नमः । व्याघ्रचर्माम्बरधराय नमः । भीमाय नमः । ह्रीं (क्लीं) कारनायकाय नमः । ह्रीं(ऐं) काररुद्राय
नमः । त्रिशिवाय नमः । तत्त्वातीताय नमः । निरञ्जनाय नमः । रामाय नमः । अनन्ताय नमः । तत्त्वमूर्तये
नमः । रुद्राय नमः । ८० । ॐ कालान्तकाय नमः । अव्ययाय नमः ।
क्ष्म्र्यूङ्कारशम्भवे नमः । अव्यक्ताय नमः । त्रिगुणाय नमः । चित्प्रकाशकाय नमः । सौङ्कार सोमाय नमः । तत्त्वज्ञाय
नमः । अघोराय नमः । दक्षाध्वरान्तकाय नमः । कामारये नमः । गजसंहर्त्रे नमः । वीरभद्राय नमः । सदाशिवाय नमः । भिक्षाटनाय नमः ।
कृष्णगन्धप्रियाय नमः । कङ्कालभैरवाय नमः । नृसिंहगर्वहरणाय
नमः । भद्रकालीमदान्तकाय नमः । निर्विकल्पाय नमः । १००। ॐ निराकाराय नमः ।
निर्मलाङ्गाय नमः । निरामयाय नमः । ब्रह्मविष्णुप्रियाय नमः । आनन्दनटेशाय नमः । भक्तवत्सलाय नमः । श्रीमद्दभ्रसभानाथाय
नमः । शिवकामीमनोहराय नमः । १०८ । ॐ चित्सभेशाय विद्महे । नटराजायधीमहि । तन्नः शिवः प्रचोदयात् ।

। श्री अमरनाथाष्टकम् ।

भागीरथीसलिलसान्द्रजटाकलापम्
शीतांशुकान्ति-रमणीय-विशाल-भालम् ।
कर्पूरदुग्धहिमहंसनिभं स्वतोजम्
नित्यं भजाम्यऽमरनाथमहं दयालुम् ॥ १॥
गौरीपतिं पशुपतिं वरदं त्रिनेत्रम्
भूताधिपं सकललोकपतिं सुरेशम् ।
शार्दूलचर्मचितिभस्मविभूषिताङ्गम्
नित्यं भजाम्यऽमरनाथमहं दयालुम् ॥ २॥
गन्धर्वयक्षरसुरकिन्नर-सिद्धसङ्घैः
संस्तूयमानमनिशं श्रुतिपूतमन्त्रैः ।
सर्वत्रसर्वहृदयैकनिवासिनं तम्
नित्यं भजाम्यऽमरनाथमहं दयालुम् ॥ ३॥
व्योमानिलानलजलावनिसोमसूर्य
होत्रीभिरष्टतनुभिर्जगदेकनाथः ।
यस्तिष्ठतीह जनमङ्गलधारणाय
तं प्रार्थयाम्यऽमरनाथमहं दयालुम् ॥ ४॥
शैलेन्द्रतुङ्गशिखरे गिरिजासमेतम्
प्रालेयदुर्गमगुहासु सदा वसन्तम् ।
श्रीमद्गजाननविराजित दक्षिणाङ्कम्
नित्यं भजाम्यऽमरनाथमहं दयालुम् ॥ ५॥
वाग्बुद्धिचित्तकरणैश्च तपोभिरुग्रैः
शक्यं समाकलयितुं न यदीयरूपम् ।
तं भक्तिभावसुलभं शरणं नतानाम्
नित्य भजाम्यऽमरनाथमहं दयालुम् ॥ ६॥
आद्यन्तहीनमखिलाधिपतिं गिरीशम्
भक्तप्रियं हितकरं प्रभुमद्वयैकम् ।
सृष्टिस्थितिप्रलयलीलमनन्तशक्तिम्
नित्यं भजाम्यऽमरनाथमहं दयालुम् ॥ ७॥
हे पार्वतीश वृषभध्वज शूलपाणे
हे नीलकण्ठ मदनान्तक शुभ्रमूर्ते ।
हे भक्तकल्पतरुरूप सुखैकसिन्धो
मां पाहि पाहि भवतोऽमरनाथ नित्यम् ॥ ८॥

इति स्वामी वरदानन्दभारतीविरचितं श्रीअमरनाथाष्टकं सम्पूर्णम् ।

॥ आर्तत्राणस्तोत्रम् गङ्गाधरस्तोत्रम् च ॥

अप्पयदीक्षितविरचितम्

क्षीराम्भोनिधिमन्थनोद्भवविषात् सन्दह्यमानान् सुरान्
ब्रह्मादीनवलोक्य यः करुणया
हालाहलाख्यं विषम् ।
निश्शङ्कं निजलीलया
कवलयन् लोकान् ररक्षादरात्
आर्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ १॥

क्षीरं स्वादु निपीय मातुलगृहे गत्वा स्वकीयं गृहं
क्षीरालाभवशेन खिन्नमनसे घोरं तपः कुर्वते ।
कारुण्यादुपमन्यवे निरवधिं क्षीराम्बुधिं दत्तवान्
आर्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ २॥

मृत्युं वक्षसि ताडयन् निजपदध्यानैकभक्तं मुनिं
मार्कण्डेयमपालयत् करुणया लिङ्गाद्विनिगत्य यः ।
नेत्राम्भोजसमर्पणेन हरयेऽभीष्टं रथाङ्गं ददौ
आर्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ ३॥

ऊढं द्रोणजयद्रथादिरथिकैः सैन्यं महत् कौरवं
दृष्ट्वा कृष्णसहायवन्तमपि तं भीतं प्रपन्नार्तिहा ।
पार्थं रक्षितवानमोघविषयं दिव्यास्त्रमुद्घोषयन्
आर्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ ४॥

बालं शैवकुलोद्भवं परिहसत्स्वज्ञातिपक्षाकुलं
खिद्यन्तं तव मूर्ध्नि
पुष्पनिचयं दातुं समुध्यत्करम् ।
दृष्ट्वाऽऽनम्य वरिञ्चिरम्यनगरे पूजां त्वदीयां भजन्
आर्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ ५॥

सन्त्रस्तेषु पुरा सुरासुरभयादिन्द्रादिवृन्दारके-
ष्वारूढो धरणीरथं श्रुतिहयं कृत्वा मुरारिं शरम् ।
रक्षन् यः कृपया समस्तविबुधान्
जित्वा पुरारीन् क्षणात्
आर्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ ६॥

श्रौतस्मार्तपथे पराङ्मुखमपि प्रोद्यन्महापातकं
विश्वातीतमपत्यमेव गतिरित्यालापयन्तं सकृत् ।
रक्षन् यः करुणापयोनिधिरिति प्राप्तप्रसिद्धिः पुरा
ह्यार्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ ७॥

गाङ्गं वेगमवाप्य मान्यविबुधैः सोढुं पुरा याचितो
दृष्ट्वा भक्तभगीरथेन विनतो रुद्रो जटामण्डले ।
कारुण्यादवनीतले सुरनदीमापूरयतपावनीं
आर्तत्राणपरायणः
स भगवान् गङ्गाधरो मे गतिः ॥ ८॥

॥ इति श्रीमदप्पयदीक्षितविरचितं आर्तत्राणस्तोत्रं सम्पूर्णम् ॥

| कालभैरव अष्टकम |

देवराज सेव्यमान पावनाङ्घ्रि पङ्कजं
व्यालयज्ञ सूत्रमिन्दु शेखरं कृपाकरम् ।
नारदादि योगिबृन्द वन्दितं दिगम्बरं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 1 ॥
भानुकोटि भास्वरं भवब्धितारकं परं
नीलकण्ठ मीप्सितार्ध दायकं त्रिलोचनम् ।
कालकाल मम्बुजाक्ष मस्तशून्य मक्षरं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 2 ॥
शूलटङ्क पाशदण्ड पाणिमादि कारणं
श्यामकाय मादिदेव मक्षरं निरामयम् ।
भीमविक्रमं प्रभुं विचित्र ताण्डव प्रियं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 3 ॥
भुक्ति मुक्ति दायकं प्रशस्तचारु विग्रहं
भक्तवत्सलं स्थितं समस्तलोक विग्रहम् ।
निक्वणन्-मनोज्ञ हेम किङ्किणी लसत्कटिं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 4 ॥
धर्मसेतु पालकं त्वधर्ममार्ग नाशकं
कर्मपाश मोचकं सुशर्म दायकं विभुम् ।
स्वर्णवर्ण केशपाश शोभिताङ्ग निर्मलं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 5 ॥
रत्न पादुका प्रभाभिराम पादयुग्मकं
नित्य मद्वितीय मिष्ट दैवतं निरञ्जनम् ।
मृत्युदर्प नाशनं करालदंष्ट्र भूषणं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 6 ॥
अट्टहास भिन्न पद्मजाण्डकोश सन्ततिं
दृष्टिपात नष्टपाप जालमुग्र शासनम् ।
अष्टसिद्धि दायकं कपालमालिका धरं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 7 ॥
भूतसङ्घ नायकं विशालकीर्ति दायकं
काशिवासि लोक पुण्यपाप शोधकं विभुम् ।
नीतिमार्ग कोविदं पुरातनं जगत्पतिं
काशिकापुराधिनाथ कालभैरवं भजे ॥ 8 ॥

॥ आत्मनाथस्तुतिः वातपुरीश्वरकृता ॥

मन्दहाससुन्दरारविन्दवक्त्रशोभितं
नन्दनीयभूसुरावतारवन्दितद्विजम् ।
कुन्दकुड्मजालरम्यदन्तपङ्क्तिभासितं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ १॥

कुण्डलीशकुण्डलं महाण्डकादिताण्डवं
चण्डभानुदीधितिप्रकाण्डकान्तिकुण्डलम् ।
पुण्डरीकवर्यचर्ममण्डितावलग्नकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ २॥

पुण्डरीकपूःसमृद्ध्यताण्डवं दयाकरं
खण्डितामरेन्द्रवैरिमण्डलं महाप्रभुम् ।
खण्डशीतरश्मिफालमण्डलाग्निमण्डलं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ३॥

अक्षयार्थदायकं प्रतिक्षणं क्षमापकं
रक्षितद्विजार्भकं प्रधक्षितारिलक्षकम् ।
दक्षयागशिक्षकं विचक्षणं सुरक्षकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ४॥

कञ्जजादिदानवारिपुञ्जवन्दिताङ्घ्रिकं
भञ्जिताश्रितापदं तमञ्जसार्थदायकम् ।
मञ्जुलामृतादियुक्तिवाक्यजालरञ्जकं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ५॥

तुङ्गभङ्गराजितामराधिपाङ्गमुज्ज्वलद्
बालसोमचूडकं भुजङ्गभूषिताङ्गकम् ।
सङ्गहीनभक्तशीलपालकं जगद्गुरुं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ६॥

कालकालमम्बुजाक्षनेत्रपूजिताङ्घ्रिकं
कालिमार्द्रकन्धरं कपालशूलधारिणम् ।
मूलकारणं जगत्प्रचालकस्य शङ्करं
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ७॥

कुन्दमूलमृत्तिकामघामयादिमर्दिनीं
सादरं प्रधारकाः प्रभक्षकाश्च ये द्रुतम् ।
आधिपापवर्जितान्विधायकं जनांश्च तान्
कुन्दमूलमन्दिरस्थमिन्दुचूडमाश्रये ॥ ८॥

आत्मनायकस्तवं महार्थदायकं परं
वातपूःपतीरितं वरिष्ठवाञ्छितप्रदम् ।
भुक्तिमुक्तिकारणं पठेत्सकृच्छिवाग्रतो
यःस एव मुक्तिभाक् शिवाधिकप्रियो भवेत् ॥ ९॥

इति श्रीवातपुरीश्वरकृता आत्मनाथस्तुतिः समाप्ता ।

भगवान शिव के 108 नाम

ॐ भोलेनाथ नमः
ॐ कैलाश पति नमः
ॐ भूतनाथ नमः
ॐ नंदराज नमः
ॐ नन्दी की सवारी नमः
ॐ ज्योतिलिंग नमः
ॐ महाकाल नमः
ॐ रुद्रनाथ नमः
ॐ भीमशंकर नमः
ॐ नटराज नमः
ॐ प्रलेयन्कार नमः
ॐ चंद्रमोली नमः
ॐ डमरूधारी नमः
ॐ चंद्रधारी नमः
ॐ मलिकार्जुन नमः
ॐ भीमेश्वर नमः
ॐ विषधारी नमः
ॐ बम भोले नमः
ॐ ओंकार स्वामी नमः
ॐ ओंकारेश्वर नमः
ॐ शंकर त्रिशूलधारी नमः
ॐ महादेव नमः
ॐ गढ़शंकर नमः
ॐ मुक्तेश्वर नमः
ॐ नटेषर नमः

ॐ विश्वनाथ नमः
ॐ अनादिदेव नमः
ॐ उमापति नमः
ॐ गोरापति नमः
ॐ गणपिता नमः
ॐ भोले बाबा नमः
ॐ शिवजी नमः
ॐ शम्भु नमः
ॐ नीलकंठ नमः
ॐ महाकालेश्वर नमः
ॐ त्रिपुरारी नमः
ॐ त्रिलोकनाथ नमः
ॐ त्रिनेत्रधारी नमः
ॐ बर्फानी बाबा नमः
ॐ जगतपिता नमः
ॐ मृत्युन्जन नमः
ॐ नागधारी नमः
ॐ रामेश्वर नमः
ॐ लंकेश्वर नमः
ॐ अमरनाथ नमः
ॐ केदारनाथ नमः
ॐ मंगलेश्वर नमः
ॐ अर्धनारीश्वर नमः
ॐ गिरजापति नमः
ॐ भद्रेश्वर नमः
ॐ त्रिपुनाशक नमः
ॐ निर्जेश्वर नमः

ॐ नागार्जुन नमः
ॐ जटाधारी नमः
ॐ नीलेश्वर नमः
ॐ गलसर्पमाला नमः
ॐ दीनानाथ नमः
ॐ सोमनाथ नमः
ॐ जोगी नमः
ॐ भंडारी बाबा नमः
ॐ बमलेहरी नमः
ॐ गोरीशंकर नमः
ॐ शिवाकांत नमः
ॐ महेश्वराए नमः
ॐ महेश नमः
ॐ ओलोकानाथ नमः
ॐ आदिनाथ नमः
ॐ देवदेवेश्वर नमः
ॐ प्राणनाथ नमः
ॐ शिवम् नमः
ॐ महादानी नमः
ॐ शिवदानी नमः
ॐ संकटहारी नमः
ॐ महेश्वर नमः
ॐ रुंडमालाधारी नमः
ॐ किरातेश्वर नमः
ॐ जागेश्वर नमः
ॐ अबधूतपति नमः
ॐ भीलपति नमः

ॐ जगपालनकर्ता नमः
ॐ पशुपति नमः
ॐ संगमेश्वर नमः
ॐ दक्षेश्वर नमः
ॐ घ्रेनश्वर नमः
ॐ मणिमहेश नमः
ॐ अनादी नमः
ॐ अमर नमः
ॐ आशुतोष महाराज नमः
ॐ विलवकेश्वर नमः
ॐ अचलेश्वर नमः
ॐ अभयंकर नमः
ॐ पातालेश्वर नमः
ॐ धूधेश्वर नमः
ॐ सर्पधारी नमः
ॐ त्रिलोकिनरेश नमः
ॐ हठ योगी नमः
ॐ विश्लेश्वर नमः
ॐ नागाधिराज नमः
ॐ सर्वेश्वर नमः
ॐ उमाकांत नमः
ॐ बाबा चंद्रेश्वर नमः
ॐ त्रिकालदर्शी नमः
ॐ त्रिलोकी स्वामी नमः
ॐ जितनाथ नमः
ॐ वृषेश्वर नमः
ॐ भूतेश्वर नमः
ॐ बैजूनाथ नमः
ॐ नागेश्वर नमः

| अष्टमूर्तिस्तवः |

यः पार्थिवं लिङ्गमुपेत्य शाल-
ग्रामो वटोऽश्वत्थमुखो भवँश्च ।
नानाविधान् मूर्तगुणान् प्रपेदे
तमष्टमूर्तिंशरणं प्रपद्ये ॥ १॥
योऽम्भांसि पावित्र्यगुणस्य सीमा-
मासादयंस्तीर्थपरम्पराभिः ।
एतां त्रिलोकीं शतधा पुनीते
तमष्टमूर्तिंशरणं प्रपद्ये ॥ २॥
य आश्रयात् त्रित्वमुपागतोऽपि
त्रेता त्रयीमन्त्रगुणेन भूयः ।
चराचराधारतयात्मभूत-
स्तमष्टमूर्तिं शरणं प्रपद्ये ॥ ३॥
यो योगिनां योगविभूतिसिद्धै
समाधिसिद्धान्त-पथाधिरुढम् ।
चतुर्विधप्राणि-निकायमूल-
स्तमष्टमूर्तिं शरणं प्रपद्ये ॥ ४॥
योऽनन्तखस्यापि गुरुर्गरीया-
नोऽमित्यहो व्यस्तसमस्तरीत्या ।
``खं ब्रह्म'' पाठेन यजुष्ष्वमाप्त-
स्तमष्टमूर्तिं शरणं प्रपद्ये ॥ ५॥

यो देवपौरोगवतां प्रयातः
सूर्याश्रयात् तृप्तिकरःपितृणाम् ।
आप्यायकः सर्वःमहौषधीनां
तमष्टमूर्तिं शरणं प्रपद्ये ॥ ६॥
य उष्णताद्योतखगर्क्षकेन्द्र-
मेकायनं मुक्तिपथोन्मुखानाम् ।
धामर्ग्यजुःसाममहोदयानां
तमष्टमूर्तिं शिवमेकमीडे ॥ ७॥
आत्मा यःएको यत एव विष्वग्-
ब्रह्माण्डवैचित्र्यविकाशभूमा ।
तमःप्रकाशादिविसर्गबीजं
तमष्टमूर्तिं सहशक्तिमीडे ॥ ८॥
तर्काग्नितत्वनिलयं विलयं भ्रमाणा-
मानन्दसिन्धुसदनं कदनं कुसृष्टेः ।
एतन्महेश्वरपदस्तवनं हि यस्मिन्
ज्ञाते वसन्ततिलकायितविश्वमेतत् ॥ ९॥

इति श्रीदुर्गाप्रसादद्विवेदीविरचितः अष्टमूर्ति-स्तवः सम्पूर्णः ।

॥ आत्मनाथस्तुतिः रुद्रकृता ॥

चतुर्वेदपुरीशाय शाश्वतायादिमूर्तये ।
आत्मनाथाय जगतां गुरवे ब्रह्मणे नमः ॥ १॥
सद्घनानन्दकन्दाय चिदानन्दस्वरूपिणे ।
कुन्दभूरुहवासाय गुरवे ब्रह्मणे नमः ॥ २॥
विधातृहरिमुख्यानां विश्वेषां जगतामपि ।
ज्ञानदात्रे सुमहते गुरवे ब्रह्मणे नमः ॥ ३॥
अणोरणीयसे तस्मै महतश्च महीयसे ।
तुर्यातीताय शुद्धाय गुरवे ब्रह्मणे नमः ॥ ४॥
स्रष्टुं विधातृरूपाय रक्षितुं विष्णुरूपिणे ।
संहर्तुं कालरूपाय गुरवे ब्रह्मणे नमः ॥ ५॥
विधिविश्वम्भराभीष्टप्रदाब्जचरणाय ते ।
विश्वातीताय विश्वस्मै गुरवे ब्रह्मणे नमः ॥ ६॥
सहस्रशिरसे तुभ्यं सहस्राक्षिभुजाङ्घ्रये ।
सहस्रागमवेद्याय गुरवे ब्रह्मणे नमः ॥ ७॥
पञ्चाननाय देवाय पञ्चब्रह्मस्वरूपिणे ।
पञ्चाक्षरस्वरूपाय गुरवे ब्रह्मणे नमः ॥ ८॥
मद्भर्त्रे जगतां पित्रे कारणत्रयहेतवे ।
नमस्तुभ्यं नमस्तुभ्यं नमस्तुभ्यं नमो नमः ॥ ९॥
अपराधायुतोपेतं महाकल्मषमानसम् ।
पाहि मां पाहि मां नित्यं पाहि मामात्मनायक ॥ १०॥
रुद्रेशकथितं स्तोत्रं दशकं यः पठेत् पुमान् ।
कालमृत्युमतिक्रम्य स चिरायुः सुखी भवेत् ॥ ११॥

इति श्रीरुद्रकृता आत्मनाथस्तुतिः समाप्ता ।

। त्र्यम्बकेश्वरमहिमवर्णनम् ।

त्रियम्बको नाम गिरिरस्ति प्रियतमो मम ।
मन्दराच्चापि कैलासात्तथैव कनकाचलात् ॥ १॥
ते निवासा महेशस्य त्रियम्बकगिरिस्त्वहम् ।
त्रियम्बकेश्वरं नाम्ना तल्लिङ्गं परमाद्भुतम् ॥ २॥
तल्लिङ्गं येन दृष्टं स्यात्तेन दृष्टा त्रिलोकिका ।
त्रैलोक्ये यानि लिङ्गानि तानि सर्वाणि शङ्करि ॥ ३॥
त्रियम्बकेश्वरं लिङ्गं मम सर्वार्थसिद्धिदम् ।
येन दृष्टं श्रुतं वापि प्रणतं वा समर्चितम् ॥ ४॥
स एव धन्यधौरेयः पुरुषार्थैकभाजनम् ।
तत्र सन्ति महाशैवास्त्र्यम्बकेशसमर्चकाः ॥ ५॥
भस्मोद्धूलितसर्वाङ्गाः त्रिपुण्ड्राङ्कितमस्तकाः ।
रुद्राक्षमालाभरणा रुद्रसूक्तजपादराः ॥ ६॥
पञ्चाक्षरपरा नित्यं सदा मल्लिङ्गपूजकाः ।
बहवस्तत्र देवेशि त्र्यम्बकेशं यजन्ति माम् ॥ ७॥
बिल्वपत्रैश्च कमलेस्तथा गोदावरीजलैः ।
पूतैर्मां स्नापयन्तीशे रुद्रमन्त्रैरहर्निशम् ॥ ८॥
फलमूलैश्च विविधैर्नैवेद्यैश्च सदाम्बिके ।
मत्पूजारहितास्ते तु जलमन्नं फलादिकम् ॥ ९॥
नाश्नन्ति नियतं देवि नैवेद्यैर्वर्तयन्ति ते ।
गौतमार्थे समानीता स्वमौलिस्थजटाग्रतः ॥ १०॥
पुण्या गोदावरी देवि वृद्धगङ्गेति विश्रुता ।
तस्यां स्नात्वा महानद्यां दृष्ट्वा श्रीत्र्यम्बकेश्वरम् ॥ ११॥
अश्वमेधशतात्पुण्यं भविष्यति न संशयः ॥ १२॥

॥ इति शिवरहस्यान्तर्गते शिवगौरीसंवादे त्र्यम्बकेश्वरमहिमवर्णनम् सम्पूर्णम् ॥

| अर्धनारीश्वरस्तोत्रम् |

श्रीगणेशाय नमः ॥

मन्दारमालालुलितालकायै कपालमालाङ्कितशेखराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥ १॥
एकः स्तनस्तुङ्गतरः परस्य वार्तामिव प्रष्टुमगान्मुखाग्रम् ।
यस्याः प्रियार्धस्थितिमुद्वहन्त्याः सा पातु वः पर्वतराजपुत्री ॥ २॥
यस्योपवीतगुण एव फणावृतैक-
वक्षोरुहः कुचपटीयति वामभागे ।
तस्मै ममास्तु तमसामवसानसीम्ने
चन्द्रार्धमौलिशिरसे च नमः शिवाय ॥ ३॥
स्वेदार्द्रवामकुचमण्डनपत्रभङ्ग-
संशोषिदक्षिणकराङ्गुलिभस्मरेणुः ।
स्त्रीपुंनपुंसकपदव्यतिलङ्घिनी वः
शम्भोस्तनुः सुखयतु प्रकृतिश्चतुर्थी ॥ ४॥
इत्यर्धनारीश्वरस्तोत्रं सम्पूर्णम् ।

अनादिकल्पेश्वरस्तोत्रम्

श्रीगणेशाय नमः ।।

कर्पूरगौरो भुजगेन्द्रहारो गङ्गाधरो लोकहितावहः सः ।
सर्वेश्वरो देववरोऽप्यघोरो योऽनादिकल्पेश्वर एव सोऽसौ ॥ १॥
कैलासवासी गिरिजाविलासी श्मशानवासी सुमनोनिवासी ।
काशीनिवासी विजयप्रकाशी योऽनादिकल्पेश्वर एव सोऽसौ ॥ २॥
त्रिशूलधारी भवदुःखहारी कन्दर्पवैरी रजनीशधारी ।
कपर्दधारी भजकानुसारी योऽनादिकल्पेश्वर एव सोऽसौ ॥ ३॥
लोकाधिनाथः प्रमथाधिनाथः कैवल्यनाथः श्रुतिशास्त्रनाथः ।
विद्यार्थनाथः पुरुषार्थनाथो योऽनादिकल्पेश्वर एव सोऽसौ ॥ ४॥
लिङ्गं परिच्छेत्तुमधोगतस्य नारायणश्चोपरि लोकनाथः ।
बभूवतुस्तावपि नो समर्थौ योऽनादिकल्पेश्वर एव सोऽसौ ॥ ५॥
यं रावणस्ताण्डवकौशलेन गीतेन चातोषयदस्य सोऽत्र ।
कृपाकटाक्षेण समृद्धिमाप योऽनादिकल्पेश्वर एव सोऽसौ ॥ ६॥
सकृच्च बाणोऽवनमय्य शीर्षं यस्याग्रतः सोऽप्यलभत्समृद्धिम् ।
देवेन्द्रसम्पत्त्यधिकां गरिष्ठां योऽनादिकल्पेश्वर एव सोऽसौ ॥ ७॥
गुणान्विमातुं न समर्थ एष वेषश्च जीवोऽपि विकुण्ठितोऽस्य ।
श्रुतिश्च नूनं चकितं बभाषे योऽनादिकल्पेश्वर एव सोऽसौ ॥ ८॥
अनादिकल्पेश उमेश एतत्स्तवाष्टकं यः पठति त्रिकालम् ।
स धौतपापोऽखिललोकवन्द्यं शैवं पदं यास्यति भक्तिमांश्चेत् ॥ ९॥
इति श्रीवासुदेवानन्दसरस्वतीकृतं अनादिकल्पेश्वरस्तोत्रं सम्पूर्णम् ।

| श्री अरुणाचलाष्टकम् |

दर्शनादभ्रसदसि जननात्कमलालये ।
काश्यां तु मरणान्मुक्तिः स्मरणादरुणाचले ॥ १॥
करुणापूरितापाङ्गं शरणागतवत्सलम् ।
तरुणेन्दुजटामौलिं स्मरणादरुणाचलम् ॥ २॥
समस्तजगदाधारं सच्चिदानन्दविग्रहम् ।
सहस्त्ररथसोपेतं स्मरणादरुणाचलम् ॥ ३॥
काञ्चनप्रतिमाभासं वाञ्छितार्थफलप्रदम् ।
मां च रक्ष सुराध्यक्षं स्मरणादरुणाचलम् ॥ ४॥
बद्धचन्द्रजटाजूटमर्धनारीकलेवरम् ।
वर्धमानदयाम्भोधिं स्मरणादरुणाचलम् ॥ ५॥
काञ्चनप्रतिमाभासं सूर्यकोटिसमप्रभम् ।
बद्धव्याघ्रपुरीध्यानं स्मरणादरुणाचलम् ॥ ६॥
शिक्षयाखिलदेवारिभक्षितक्ष्वेलकन्धरम् ।
रक्षयाखिलभक्तानां स्मरणादरुणाचलम् ॥ ७॥
अष्टभूतिसमायुक्तमिष्टकामफलप्रदम् ।
शिष्टभक्तिसमायुक्तान् स्मरणादरुणाचलम् ॥ ८॥
विनायकसुराध्यक्षं विष्णुब्रह्मेन्द्रसेवितम् ।
विमलारुणपादाब्जं स्मरणादरुणाचलम् ॥ ९॥
मन्दारमल्लिकाजातिकुन्दचम्पकपङ्कजैः ।
इन्द्रादिपूजितां देवीं स्मरणादरुणाचलम् ॥ १०॥
सम्पत्करं पार्वतीशं सूर्यचन्द्राग्निलोचनम् ।
मन्दस्मितमुखाम्भोजं स्मरणादरुणाचलम् ॥ ११॥

॥ इति श्रीअरुणाचलाष्टकं सम्पूर्णम् ॥

| श्री अमरनाथार्तिक्यम् |

जय जय जय शिवशङ्कर करुणाघन ईश
काश्मीरगिरिविहारिन् जयजय अमरेश ॥ १॥
ॐ हर हर हर महादेव ॥ ध्रु. ॥
उद्यत्सूर्यसमप्रभ दुग्धार्णव धवल ।
प्रालेयाप्लुतमूर्ते स्मरभञ्जनशील ॥ २॥ ॐ हर .. ॥
जगदुत्पत्तिः सर्वा तव शम्भो लास्यम् ।
अवनेरवनं सुरनरसहितं तव हास्यम् ॥ ३॥ ॐ हर .. ॥
या ते रुद्र शिवातनुरमृता हिमवेशे ।
अभिचाकशीहि भगवन् तयैव हृद्देशे ॥ ४॥ ॐ हर .. ॥
हिमगिरिगह्वरवासं कृतकल्मषनाशम् ।
भक्तजनप्रियमीशं नमामि अविनाशम् ॥ ५॥ ॐ हर .. ॥
यो भक्त्याऽर्चयति त्वां अनन्यभावेन ।
कल्पतरुश्चिन्तामणिराप्तःखलु तेन ॥ ६॥ ॐ हर .. ॥
घनदसखं रत्नोज्वल-रूपं शशिशुभ्रम् ।
स्वयम्भुवं तं वन्दे शिरसाऽहमदभ्रम् ॥ ७॥ ॐ हर .. ॥
आर्तिक्यं तेऽस्तु मुदा प्रसीद परमात्मन् ।
विघ्नान् नाशय पूरय कामान् सर्वात्मन् ॥ ८॥ ॐ हर .. ॥

इति स्वामी वरदानन्दभारतीविरचितं श्रीअमरनाथार्तिक्यमं सम्पूर्णम् ।

ॐ नमः शिवाय।

ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।
ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।

ॐ नमः शिवाय। ॐ नमः शिवाय। ॐ नमः शिवाय।

॥ इन्दुमौलिस्मरणस्तोत्रम्॥

श्रीगणेशाय नमः ॥

कलय कलावित्प्रवरं कलया नीहारदीधितेः शीर्षम् ।
सततमलङ्कुर्वाण प्रणतावनदीक्ष यक्षराजसख ॥ १॥
कान्तागेन्द्रसुतायाः शान्ताहङ्कारचिन्त्यचिद्रूप ।
कान्तारखेलनरुचे शान्तान्तःकरणं दीनमव शम्भो ॥ २॥
दाक्षायणीमनोम्ब्रुजभानो वीक्षावितीर्णविनतेष्ट ।
द्राक्षामधुरिममदभरशिक्षाकर्त्रीं प्रदेहि मम वाचम् ॥ ३॥
पारदसमानवर्णौ नीरदनीकाशदिव्यगलदेशः ।
पादनतदेवसङ्घः पशुमनिशं पातु मामीशः ॥ ४॥
भव शम्भो गुरुरूपेणाशु मेऽद्य करुणाब्धे ।
चिरतरमिह वासं कुरु जगतीं रक्षन् प्रबोधनानेन ॥ ५॥
यक्षाधिपसखमनिशं रक्षाचतुरं समस्तलोकानाम् ।
वीक्षादापितकवितं दाक्षायण्याः पतिं नौमि ॥ ६॥
यमनियमनिरतलभ्यं शमदममुखषड्कदानकृतदीक्षम् ।
रमणीयपदसरोजं शमनाहितमाश्रये सततम् ॥ ७॥
यमिहृन्मानसहंसं शमिताघौघं प्रणाममात्रेण ।
अमितायुःप्रदपूजं कमितारं नौमि शैलतनयायाः ॥ ८॥
येन कृतमिन्दुमौले मानववर्येण तावकस्मरणम् ।
तेन जितं जगदखिलं को न ब्रूते सुरार्यतुल्येन ॥ ९॥

इति इन्दुमौलिस्मरणस्तोत्रं सम्पूर्णम् ॥

| शिवाष्टकम् |

आशावशादष्टदिगन्तराले
देशान्तरभ्रान्तमशान्तबुद्धिम् ।
आकारमात्रादवनीसुरं मा-
मकुत्सकुत्स्यं शिव पाहि शम्भो ॥ १॥ (मकृत्यकृत्यं)

मांसास्थिमज्जामलमूत्रपात्र-
गात्राभिमानं क्रिमिकृस्नजालम् । (गात्राभिमानोत्सितकृत्यजालम्)
मद्भावनं मन्मथपीडिताङ्गं
मायामयं मां शिव पाहि शम्भो ॥ २॥

संसारमायाजलधिप्रवाह-
सम्मग्नमुद्भ्रान्तमशान्तचित्तम् ।
त्वत्पादसेवाविमुखं सकामं
सुदुर्ज्जनं मां शिव पाहि शम्भो ॥ ३॥

इष्टानृतं भ्रष्टमनिष्टधर्म्मं
नष्टात्मबोधं नयलेशहीनम् ।
कष्टारिषड्वर्गनिपीडिताङ्गं
दुष्टोत्तमं मां शिव पाहि शम्भो ॥ ४॥

वेदागमाभ्यः सरसानभिज्ञं
पादारविन्दं तव नार्च्चयन्तम् ।
वेदोक्तकर्म्माणि विलोपयन्तं
वेदाकृते मां शिव पाहि शम्भो ॥ ५॥

अन्यायवित्ताज्र्जन सक्तचित्तं
अन्यासु नारीष्वनुरागवन्तम् ।
अन्यान्नभोक्तारमशुद्धदेहं
आचारहीनं शिव पाहि शम्भो ॥ ६॥

पुरात्ततापत्रयतप्तदेहं
परां गतिं गन्तुमुपायवर्ज्जम् ।
परावमानैकपरात्मभावं
नराधमं मां शिव पाहि शम्भो ॥ ७॥

पिताऽथ संरक्षतु पुत्रमीशो (पिता यथा रक्षति)
जगत्पिता त्वं जगत्सहायः । (जगतः सहायम्)
कृतापराधं तव सर्वकार्ये
कृपानिधे मां शिव पाहि शम्भो ॥ ८॥

इति अपराधाष्टकं अथवा शिवाष्टकं सम्पूर्णम् ।

। शिवताण्डवस्तोत्रम् ।

जटाटवीगलज्जलप्रवाहपावितस्थले
गलेऽवलम्ब्य लम्बितां भुजङ्गतुङ्गमालिकाम् ।
डमड्डमड्डमड्डमन्निनादवड्डमर्वयं
चकार चण्डताण्डवं तनोतु नः शिवः शिवम् ॥१॥

जटाकटाहसम्भ्रमभ्रमन्निलिम्पनिर्झरी
विलोलवीचिवल्लरीविराजमानमूर्धनि ।
धगद्धगद्धगज्ज्वलल्ललाटपट्टपावके
किशोरचन्द्रशेखरे रतिः प्रतिक्षणं मम ॥२॥

धराधरेन्द्रनंदिनीविलासबन्धुबन्धुर
स्फुरद्दिगन्तसन्ततिप्रमोदमानमानसे ।
कृपाकटाक्षधोरणीनिरुद्धदुर्धरापदि
क्वचिद्दिगम्बरे(क्वचिच्चिदम्बरे) मनो विनोदमेतु वस्तुनि ॥३॥

जटाभुजङ्गपिङ्गलस्फुरत्फणामणिप्रभा
कदम्बकुङ्कुमद्रवप्रलिप्तदिग्वधूमुखे ।
मदान्धसिन्धुरस्फुरत्त्वगुत्तरीयमेदुरे
मनो विनोदमद्भुतं बिभर्तु भूतभर्तरि ॥४॥

सहस्त्रलोचनप्रभृत्यशेषलेखशेखर
प्रसूनधूलिधोरणी विधूसराङ्घ्रिपीठभूः ।
भुजङ्गराजमालया निबद्धजाटजूटक
श्रियै चिराय जायतां चकोरबन्धुशेखरः ॥५॥

ललाटचत्वरज्वलद्धनञ्जयस्फुलिङ्गभा
निपीतपञ्चसायकं नमन्निलिम्पनायकम् ।
सुधामयूखलेखया विराजमानशेखरं
महाकपालिसम्पदेशिरोजटालमस्तु नः ॥६॥

करालभालपट्टिकाधगद्धगद्धगज्ज्वल
द्धनञ्जयाहुतीकृतप्रचण्डपञ्चसायके ।
धराधरेन्द्रनन्दिनीकुचाग्रचित्रपत्रक
प्रकल्पनैकशिल्पिनि त्रिलोचने रतिर्मम ॥७॥

नवीनमेघमण्डली निरुद्धदुर्धरस्फुरत्
कुहूनिशीथिनीतमः प्रबन्धबद्धकन्धरः ।
निलिम्पनिर्झरीधरस्तनोतु कृत्तिसिन्धुरः
कलानिधानबन्धुरः श्रियं जगद्धुरंधरः ॥८॥

प्रफुल्लनीलपङ्कजप्रपञ्चकालिमप्रभा
वलम्बिकण्ठकन्दलीरुचिप्रबद्धकन्धरम् ।
स्मरच्छिदं पुरच्छिदं भवच्छिदं मखच्छिदं
गजच्छिदांधकच्छिदं तमन्तकच्छिदं भजे ॥९॥

अगर्व सर्वमङ्गलाकलाकदम्बमञ्जरी
रसप्रवाहमाधुरी विजृम्भणामधुव्रतम् ।
स्मरान्तकं पुरान्तकं भवान्तकं मखान्तकं
गजान्तकान्धकान्तकं तमन्तकान्तकं भजे ॥१०॥

जयत्वदभ्रविभ्रमभ्रमद्भुजङ्गमश्वस
द्विनिर्गमत्क्रमस्फुरत्करालभालहव्यवाट् ।
धिमिद्धिमिद्धिमिध्वनन्मृदङ्गतुङ्गमङ्गल
ध्वनिक्रमप्रवर्तित प्रचण्डताण्डवः शिवः ॥११॥

दृषद्विचित्रतल्पयोर्भुजङ्गमौक्तिकस्त्रजोर्
गरिष्ठरत्नलोष्ठयोः सुहृद्विपक्षपक्षयोः ।
तृणारविन्दचक्षुषोः प्रजामहीमहेन्द्रयोः
समं प्रव्रितिकः कदा सदाशिवं भजाम्यहम ॥१२॥

कदा निलिम्पनिर्झरीनिकुञ्जकोटरे वसन्
विमुक्तदुर्मतिः सदा शिरः स्थमञ्जलिं वहन् ।
विमुक्तलोललोचनो ललामभाललग्नकः
शिवेति मंत्रमुच्चरन् कदा सुखी भवाम्यहम् ॥१३॥

निलिम्प नाथनागरी कदम्ब मौलमल्लिका-
निगुम्फनिर्भक्षरन्म धूष्णिकामनोहरः ।
तनोतु नो मनोमुदं विनोदिनींमहनिशं
परिश्रय परं पदं तदङ्गजत्विषां चयः ॥१४॥

प्रचण्ड वाडवानल प्रभाशुभप्रचारणी
महाष्टसिद्धिकामिनी जनावहूत जल्पना ।
विमुक्त वाम लोचनो विवाहकालिकध्वनिः
शिवेति मन्त्रभूषगो जगज्जयाय जायताम् ॥१५॥

इमं हि नित्यमेवमुक्तमुत्तमोत्तमं स्तवं
पठन्स्मरन्ब्रुवन्नरो विशुद्धिमेतिसंततम् ।
हरे गुरौ सुभक्तिमाशु याति नान्यथा गतिं
विमोहनं हि देहिनां सुशङ्करस्य चिंतनम् ॥१६॥

पूजावसानसमये दशवक्त्रगीतं
यः शम्भुपूजनपरं पठति प्रदोषे ।
तस्य स्थिरां रथगजेन्द्रतुरङ्गयुक्तां
लक्ष्मीं सदैव सुमुखिं प्रददाति शम्भुः ॥१७॥

इति श्रीरावण कृतम्
शिव ताण्डव स्तोत्रम्स म्पूर्णम्

| श्रीमदनादिसिद्धलिङ्गस्तवनम् |

(उभयकविताविशारद षडक्षरदेवविरचितम्)

जगज्जालपालं जनस्तुत्यशीलम्
भवारण्यदावं भृत स्वानुभावम् ।
शिवानन्दकोशं दिनेशप्रकाशम्
महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥ १॥

स्वतन्त्र स्वलीलं गणेन्द्रानुकूलम्
मिलन्मूलमन्त्रं प्रणीतेश तन्त्रम् ।
शिवध्यानसक्तं परानादिमुक्तम्
महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥ २॥

परिव्राड्वरेण्यं गणेशाग्रगण्यम्
सदासत्यभाषं शिवज्ञानभूषम् ।
सरुद्राक्षमालं लसद्भस्मफालम्
महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥ ३॥

शिवाचारपक्षं कृपाभृत्कटाक्षम्
षडध्वादिबीजं नतामर्त्यभूजम् ।
परित्यक्तरागं परब्रह्मयोगम्
महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥ ४॥

कलासत्कलापं कपर्दिस्वरूपम्
मनोवृत्तिशून्यं मुनिव्रातमान्यम् ।
समञ्चद्गुणाङ्कं सदा निष्कलङ्कम्
महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥ ५॥

पवित्राभिधेयं पराम्नायगेयं
निरस्ताङ्गजातं सुधास्फीतगीतम् ।
परिच्छिन्नपाशं समस्तामरेशम्
महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥ ६॥

पवित्रस्वगात्रं बुधस्तोत्र पात्रम्
निकृत्तावरोधं निसर्गावबोधम् ।
चिदामोदभाजं चराचार्यराजम्
महालिङ्गसङ्गं
भजे सिद्धलिङ्गम् ॥ ७॥

जितारातिवर्गं गृहीताद्यमार्गम्
तताम्नायसारं तमस्तोमदूरम् ।
पराषट्स्थालाङ्कं निरातङ्कशङ्कम्
महालिङ्गसङ्गं भजे सिद्धलिङ्गम् ॥ ८॥

भुजङ्गप्रयातं स्तवं सिद्धलिङ्ग
प्रभोर्मूलमन्त्राभिधानेन क्लुप्तम् ।
भुजङ्गाश्रमस्थस्य योवा पठे-
त्सोऽप्यवाप्नोत्यभीष्टं च भोगं च मोक्षम् ॥

इति उभयकविताविशारद
षडक्षरदेवविरचितं श्रीमदनादि सिद्धलिङ्गस्तवनम् ।

| अरुणगिरिध्यानस्तुतिः |

अरुणगिरिरिहेड्यः स्कन्द सत्कीर्तिसूक्ति-
प्रकटितनिजभक्तिः निस्पृहः शुद्धसत्वः ।
अनुदिनमगजातासूनुधामाटनोद्यद्-
रतिरखिल सुपूज्यः साञ्जलिर्भूतिभूषः ॥
इति अरुणगिरिध्यानस्तुतिः समाप्ता ।

| आत्मनाथवेदपादस्तुतिः ब्रह्मकृता |

नित्याय निर्विकल्पाय निर्मलाय महौजसे ।
निराकाराय गुरवे जगतां गुरवे नमः ॥ १॥
नादाय बिन्दुरूपाय कलाकाराय तेजसे ।
सहस्त्रभुजपादाय सहस्त्राक्षाय ते नमः ॥ २॥
चिदानन्दाय शुद्धाय महानन्दस्वरूपिणे ।
महादेवादिदेवाय पशूनां पतये नमः ॥ ३॥
अणोरणीयसे तुभ्यं महतश्च महीयसे ।
परात्पराय पुण्याय क्षेत्राणां पतये नमः ॥ ४॥
वेदागमविचिन्त्याय वेधसेऽजिनवाससे ।
बहिर्मुखैरदृश्याय दिशाञ्च पतये नमः ॥ ५॥
स्वेच्छासृष्टाखिलाण्डाय कारणत्रयहेतवे ।
भक्तचित्तनिवासाय सेनानां पतये नमः ॥ ६॥
चन्द्रखण्डावतंसाय चराचरमयाय ते ।
शाश्वतायादिदेवाय वृक्षाणां पतये नमः ॥ ७॥
त्वदाधारमिदं सर्वं त्वदन्तस्समुपस्थितम् ।
त्वमात्मनाथस्सर्वेषां पुष्टानां पतये नमः ॥ ८॥
जगन्मात्रे जगद्धात्रे जगद्भर्त्रे सुतेजसे ।
मत्पित्रे जगतां भर्त्रे ह्यन्नानां पतये नमः ॥ ९॥
शरणं भव सर्वेश त्वमेव शरणं मम ।
पाहि मां पाहि मां नित्यं पाहि मामात्मनायक ! ॥ १०॥

इति आत्मनाथवेदपादस्तुतिः समाप्ता ।



अर्धनारीश्वरस्तोत्रम्

चाम्पेयगौरार्धशरीरकायै कर्पूरगौरार्धशरीरकाय ।
धम्मिल्लकायै च जटाधराय नमः शिवायै च नमः शिवाय ॥ १॥
कस्तूरिकाकुङ्कुमचर्चितायै चितारजःपुञ्जविचर्चिताय ।
कृतस्मरायै विकृतस्मराय नमः शिवायै च नमः शिवाय ॥ २॥
झणत्क्वणत्कङ्कणनूपुरायै पादाब्जराजत्फणिनूपुराय ।
हेमाङ्गदायै भुजगाङ्गदाय नमः शिवायै च नमः शिवाय ॥ ३॥
विशालनीलोत्पललोचनायै विकासिपङ्केरुहलोचनाय ।
समेक्षणायै विषमेक्षणाय नमः शिवायै च नमः शिवाय ॥ ४॥
मन्दारमालाकलितालकायै कपालमालाङ्कितकन्धराय ।
दिव्याम्बरायै च दिगम्बराय नमः शिवायै च नमः शिवाय ॥ ५॥
अम्भोधरश्यामलकुन्तलायै तडित्प्रभाताम्रजटाधराय ।
निरीश्वरायै निखिलेश्वराय नमः शिवायै च नमः शिवाय ॥ ६॥
प्रपञ्चसृष्ट्युन्मुखलास्यकायै समस्तसंहारकताण्डवाय ।
जगज्जनन्यै जगदेकपित्रे नमः शिवायै च नमः शिवाय ॥ ७॥
प्रदीप्तरत्नोज्ज्वलकुण्डलायै स्फुरन्महापन्नगभूषणाय ।
शिवान्वितायै च शिवान्विताय नमः शिवायै च नमः शिवाय ॥ ८॥
एतत्पठेदष्टकमिष्टदं यो भक्त्या स मान्यो भुवि दीर्घजीवी ।
प्राप्नोति सौभाग्यमनन्तकालं भूयात्सदा तस्य समस्तसिद्धिः ॥ ९॥
इति श्रीमत्परमहंसपरिव्राजकाचार्यस्य श्रीगोविन्दभगवत्पूज्यपादशिष्यस्य
श्रीमच्छंकरभगवतः कृतौ अर्धनारीश्वरस्तोत्रम् संपूर्णम् ॥

अष्टमूर्तिस्तोत्रम्

श्रीगणेशाय नमः ॥

ईशा वास्यमिदं सर्वं चक्षोः सूर्यो अजायत ।
इति श्रुतिरुवाचातो महादेवः परावरः ॥ १॥
अष्टमूर्तेरसौ सूर्यौ मूर्तित्वं परिकल्पितः ।
नेत्रत्रिलोचनस्यैकमसौ सूर्यस्तदाश्रितः ॥ २॥
यस्य भासा सर्वमिदं विभातीदि श्रुतेरिमे ।
तमेव भान्तमीशानमनुभान्ति खगादयः ॥ ३॥
ईशानः सर्वविद्यानां भूतानां चेति च श्रुतेः ।
वेदादीनामप्यधीशः स ब्रह्मा कैर्न पूज्यते ॥ ४॥
यस्य संहारकाले तु न किञ्चिदवशिष्यते ।
सृष्टिकाले पुनः सर्वं स एकः सृजति प्रभुः ॥ ५॥
सूर्याचद्रमसौ धाता यथापूर्वमकल्पयत् ।
इति श्रुतेर्महादेवः श्रेष्ठोऽर्यः सकलाश्रितः ॥ ६॥
विश्वं भूतं भवद्भव्यं सर्वं रुद्रात्मकं श्रुतम् ।
मृत्युञ्जयस्तारकोऽतः स यज्ञस्य प्रसाधनः ॥ ७॥
विषमाक्षोऽपि समदृक् सशिवोऽपि शिवः स च ।
वृषसंस्थोऽध्यतिवृषो गुणात्माऽप्यगुगुणोऽमलः ॥ ८॥
यदाज्ञामुद्वहन्त्यत्र शिरसा सासुराः सुराः ।
अभ्रं वातो वर्षं इतीषवो यस्य स विश्वपाः ॥ ९॥
भिषक्रमं त्वा भिषजां शृणोमीति श्रुतेरवम् ।
स्वभक्तसंसारमहारोगहर्ताऽपि शङ्करः ॥ १०॥

इत्यष्टमूर्तिस्तोत्रं सम्पूर्णम् ।

ಕಾಶೀಸ್ತುತಿಃ

ಧನ್ಯಾಸಿಕಾಶೀ ಶಿವಧನ್ಯಕಾಶೀ
ಗಾಯಂತಿಮರ್ತ್ಯಾ ಸುಖದಾಽಸಿ ಕಾಶೀ .
ತವೈವ ಕ್ರೋಢಏ ವಸತೋಹಿ ಜೀವಾಃ
ಕಾಲಾತ್ ಸುಭೀತಾ ನಭವಂತಿ ಕಾಶೀ .. 1..
ಧನ್ಯಾಸಿ ಕಾಶೀ ಸುಖಶಾಂತಿ ರಾಶೀ
ಘೋರಾಂಧಕಾರೇ ಘನಜ್ಯೋತಿ ರಾಶೀ .
ಜೀವಾನ್ ಸ್ವಜ್ಞಾನೇನಪ್ರಕಾಶದಾಽಸಿ
ಧನ್ಯಾಽಸಿ ಕಾಶೀ ಶಿವವಾಸದಾಽಸಿ .. 2..
ಕಾಶ್ಯಾಂ ಮರಣ ಮಾತ್ರೇಣ ಜೀವಾನಾಂ ಶ್ರೀಸದಾಶಿವಃ .
ದದಾತಿ ತಾರಕಂ ಮಂತ್ರಂ ತೇನ ಜೀವೋವಿಮುಚ್ಯತೇ .. 3..
ಮರಣಾಸನ್ನ ಜೀವಾನಾಂ ದಕ್ಷಿಣೇ ಕರ್ಣಗೋಲಕೇ .
ದದಾತಿ ವಿಮಲಂ ಜ್ಞಾನಂ ನಿರ್ವಾಣ ಪದದಾಯಕಂ .. 4..
ಅಸ್ಮಿನ್ಕ್ಷೇತ್ರೇ ಮೃತಾಜೀವಾ ಮುಕ್ತಾಏವ ನ ಸಂಶಯಃ .
ಇತಿಶಾಸ್ತ್ರ ಪ್ರಮಾಣಾನಿ ಪ್ರವದಂತಿಮನೀಷಿಣಃ .. 5..
ಜಟಾ ವಿಶಾಲಾ ನಯನಾ ವಿಶಾಲಾಃ
ಫಣೀಂದ್ರಮಾಲಾ ಪರಮಾ ವಿಶಾಲಾ .
ಅಗಾಧಗಾಂಭೀರ್ಯ ವಿಮುಕ್ತಿಶಾಲಾಂ
ಕಾಲಸ್ಯ ಕಾಲಂ ಪ್ರಣಮಾಮಿ ಶಂಭುಂ .. 6..
ಇತಿ ಶ್ರೀ ಸ್ವಾಮೀ ಉಮೇಶ್ವರಾನಂದತೀರ್ಥವಿರಚಿತಂ ಕಾಶೀಷಟಕಂ ಸಂಪೂರ್ಣಂ
.

கௌ3ரீபதிஶதநாமாவளி:

ப்3ரு'ஹஸ்பதிருவாச -

ஓ ருத்3ராய நம: । நீலாய । பீ4மாய । பரமாத்மநே । கபர்தி3நே । ஸுரேஶாய । வ்யோமகேஶாய । வ்ரு'ஷப4த்4வஜாய । ஸோமாய । ஸோமநாதா2ய । ஶம்ப4வே । தி3க3ம்ப3ராய । ப4ர்கா3ய । உமாகாந்தாய । தபோமயாய । ப4வ்யாய । ஶிவாய । ஶ்ரேஷ்டா2ய । விஷ்ணவே । வ்யாலப்ரியாய நம: । 20

ஓ வ்யாலாய நம: । வ்யாலாநாம் பதயே । மஹீத4ராய । வ்யாக்4ராய । பஶூநாம் பதயே । புராந்தகாய । ஸிம்ஹாய । ஶார்தூ3லாய । மகா2ய । மீநாய । மீநநாதா2ய । ஸித்3தா4ய । பரமேஷ்டி2நே । காமாந்தகாய । பு3த்3தா4ய । பு3த்3தீ4நாம் பதயே । கபோதாய । விஶிஷ்டாய । ஶிஷ்டாய । ஸகலாத்மநே நம: । 40

ஓ வேதா3ய நம: । வேத3ஜீவாய । வேத3கு3ஹ்யாய । தீ3ர்கா4ய । தீ3ர்க4ரூபாய । தீ3ர்கா4ர்தா2ய । அவிநாஶிநே । ஜக3த்ப்ரதிஷ்டா2ய । வ்யோமரூபாய । க3ஜாஸுரமஹாகாலாய । அந்த4காஸுரபே4தி3நே । நீலரூபாய । லோஹிதரூபாய । ஶுக்லரூபாய । சண்ட3முண்ட3ப்ரியாய । ப4க்திப்ரியாய । தே3வாய । ஜ்ஞாத்ரே । ஜ்ஞாநிநே । அவ்யயாய நம: । 60

ஓ மஹேஶாய நம: । மஹாதே3வாய । ஹராய । த்ரிநேத்ராய । த்ரிவேதா3ய । வேதா3ங்கா3ய । அர்தா2ய । அர்த2ரூபாய । பரமார்தா2ய । விஶ்வபூ4பாய । விஶ்வாய । விஶ்வநாதா2ய । ஶங்கராய । காலாய । காலாவயவரூபிணே । அரூபாய । விரூபாய । ஸூக்ஷ்மஸூக்ஷ்மாய । ஶ்மஶாநவாஸிநே । க்ரு'த்திவாஸஸே நம: । 80

ஓ பூ4ம்நே நம: । ஶஶாங்கஶேக2ராய । ஈஶாய । உக்3ரபூ4மிஶயாய । து3ர்கா3ய । து3ர்க3பாராய । து3ர்கா3வயவஸாக்ஷிணே । லிங்க3ரூபாய । லிங்கா3ய । லிங்கா3நாம் பதயே । ப்ரலயரூபாய । ப்ரணவார்தா2ய । காரணகாரணாய । ம்ரு'த்யுஞ்ஜயாய । ஆத்மப4வஸ்வரூபிணே । த்ர்யம்ப3காய । அஸிதகண்டா2ய । ஶர்வாய । கௌ3ரீபதயே । ஸகலமங்க3ளஹேதவே நம: । 100

జన్మసాగరోత్తారణస్తోత్రమ్

శ్రీగణేశాయ నమః ॥

శ్రీరామపూజితపదామ్బుజ చాపపాణే
　　శ్రీచక్రరాజకృతవాస కృపామ్బురాశే ।
శ్రీసేతుమూలచరణప్రవణాన్తరఙ్గ
　　శ్రీరామనాథ లఘు తారయ జన్మవార్ధిమ్ ॥ ౧॥

నమ్రాఘవృన్దవినివారణబద్ధదీక్ష
　　శైలాధిరాజతనయాపరిరబ్ధవర్ష్మన్ ।
శ్రీనాథముఖ్యసురవర్యనిషేవితాఙ్ఘ్రే
　　శ్రీరామనాథ లఘు తారయ జన్మవార్ధిమ్ ॥ ౨॥

శూరాహితేభవదనాశ్రితపార్శ్వభాగ
　　క్రూరారివర్గవిజయప్రద శీఘ్రమేవ ।
సారాఖిలాగమతదన్తపురాణపఙ్క్తేః
　　శ్రీరామనాథ లఘు తారయ జన్మవార్ధిమ్॥ ౩॥

శబ్దాదిమేషు విషయేషు సమీపగేష్వ-
　　ప్యాసక్తిగన్ధరహితాన్నిజపాదనమ్రాన్ ।
కుర్వాణ కామదహనాక్షిలసల్లలాట
　　శ్రీరామనాథ లఘు తారయ జన్మవార్ధిమ్ ॥ ౪॥

ఇతి జన్మసాగరోత్తారణస్తోత్రం సమ్పూర్ణమ్ ।

ஸ்ரீசித3ம்ப3ராஷ்டகம் 2

(ஸப்தைவ ஶ்லோகா: மாத்ரு’காயாம் ஸந்தி)

சித்தஜாந்தகம் சித்ஸ்வரூபிணம் சந்த்3ரம்ரு’க3த4ரம் சர்மப்ரிய(சர்மபீ4)கரம் ।
சதுரபா4ஷணம் சிந்மயம் கு3ரும் ப4ஜ சித3ம்ப3ரம் பா4வநாஸ்தி2தம் ॥ 1 ॥

த3க்ஷமர்த3நம் தை3வஶாஸநம் த்3விஜஹிதே ரதம் தோ3ஷப4ஞ்ஜநம் ।
து:3க2நாஶநம் து3ரிதஶாஸநம் ப4ஜ சித3ம்ப3ரம் பா4வநாஸ்தி2தம் ॥ 2 ॥

ப3த்3த4பஞ்சகம் ப3ஹுலஶோபி4தம் பு3த4வரைர்நுதம் ப4ஸ்மபூ4ஷிதம் ।
பா4வயுக்ஸ்துதம் ப3ந்து4பி:4 ஸ்துதம் ப4ஜ சித3ம்ப3ரம் பா4வநாஸ்தி2தம் ॥ 3 ॥

தீ3நதத்பரம் தி3வ்யவசநத3ம் தீ3(ர)க்ஷிதாபத3ம் தி3வ்யதேஜஸம் ।
தீ3ர்க4ஶோபி4தம் தே3ஹதத்த்வத3ம் ப4ஜ சித3ம்ப3ரம் பா4வநாஸ்தி2தம் ॥ 4 ॥

க்ஷிதிதலோத்3ப4வம் க்ஷேமஸம்ப4வம் க்ஷீணமாநவம் க்ஷிப்ரஸத்3யவம் ।
க்ஷேமதா3த்ரவம் க்ஷேத்ரகௌ3ரவம் ப4ஜ சித3ம்ப3ரம் பா4வநாஸ்தி2தம் ॥ 5 ॥

தக்ஷபூ4ஷணம் தத்த்வஸாக்ஷிணம் யக்ஷஸாக3ணம் பி4க்ஷுரூபிணம் ।
ப4ஸ்மபோஷணம் வ்யக்தரூபிணம் ப4ஜ சித3ம்ப3ரம் பா4வநாஸ்தி2தம் ॥ 6 ॥

யஸ்து ஜாபிகம் சித3ம்ப3ராஷ்டகம் பட2தி நித்யகம் பாபஹம் ஸுக2ம் ।
கடி2நதாரகம் க4டகுலாதி4கம் ப4ஜ சித3ம்ப3ரம் பா4வநாஸ்தி2தம் ॥ 7 ॥

॥ இதி ஸ்ரீசித3ம்ப3ராஷ்டகம் ஸம்பூர்ணம் ॥

हर हर महादेव।

हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।
हर हर महादेव। हर हर महादेव। हर हर महादेव। हर हर महादेव।

हर हर महादेव। हर हर महादेव। हर हर महादेव।